


केसरीसिंहः चारणः

(बारहठः)



लेखकः - शिवदानगढवी

अनुवादकः - डॉ. ललितः पटेलः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्-गुजरातम्

Shree Somnath Sanskrit University-Veraval-Gujarat

2013

॥ केसरीसिंहः चारणः ॥

(बारहठः)

प्रधानसम्पादकः

प्रो. वेम्पटि कुटुम्बशास्त्री

लेखकः

शिवदानगढवी

अनुवादकः

डॉ. ललितः पटेलः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५३२,३३ फेक्स : २४४४१७

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. दशरथः जादवः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम्

फरवरी, २०१३

प्रतयः

३००

ISBN

978-93-83097-04-3

मूल्यम्

रु. ५०/-

मुद्रकः

एच. के ओफसेट, वेरावलम्

।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचिद् अध्यापनेन, कदाचिद् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गा अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद् ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थाद् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालय एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'उज्जयिनीनगरे'** आयोजिते **''संस्कृतसाहित्योत्सवे'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुजरातराज्यगांधीनगरद्वारा प्रकाशितायाः **'सरफरोशश्रेण्याः'** कतिपयगुजरातीभाषायां प्रणीतग्रन्थानां संस्कृतभाषायाम् एकस्मिन् अभियानेऽनुवादं कारयित्वा तेषां प्रकाशनमपि विश्वविद्यालयः करोति। तदन्वयेनान्येषां नवोदितलेखकानां प्राप्तप्रतिष्ठानां लेखकानाञ्च प्रकाशितपुस्तकानां प्रकाशनमपि कर्तुं प्रवृत्तोऽस्ति। अस्मिन्नेव सन्दर्भे **शिवदानगढवी** रचितोऽयं **डॉ. ललित पटेल** अनुदितोऽयं **केसरीसिंहः चारणः (बारहठः)** नामधेयो ग्रन्थः सादरं प्रकाश्यते। अस्य ग्रन्थस्य प्रसारायाहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

प्रो. वी. कुटुम्बशास्त्री

कुलपतिः



मातृभूमिस्वतन्त्रतायै मन्त्रं रटतां, पराक्रमेण गर्जनां कुर्वन्तां बलवीराणां प्रस्थापिताः शिलास्तम्भाः अद्यापि प्रकम्प्य प्रतिध्वनिं कुर्वन्तः राष्ट्रियैक्येन सह सीमाप्रदेशे सावधानाः भवेम इत्युद्घोषयन्ति।

मातः भारत्याः केसरी – केसरीसिंहः

विशालभारतदेशः सार्धशतवर्षाणि यावत् परतन्त्रतानिगडबन्धोऽभवत् भारतदेशीयराज्यस्वस्वार्थ-वैरभाव-इर्ष्या-अहंकार–व्यसन– परतन्त्रत्व-स्वच्छन्दता-सक्षमशासनाभाव-प्रजाजागृत्यभाव-आङ्ग्लकूटनीतिवैशिष्ट्यात्।

ख्रिष्टाब्दः १८५७ तमः सङ्ग्रामोऽपि राज्ञाम् असन्तोषादेव प्रादुर्भूतः। प्रजाजागृतवर्गः सामूहिकरूपेण एकमत्या तत्र संलग्नः। समग्रासु प्रजासु इयं चेतनाज्योतिः नाविर्भूता, अतः आङ्ग्लदमनेन तस्योपशमनमभवत्। तदनन्तरं न केवलं देशीयराज्यानाम् अपि तु समग्रायाः प्रजायाः लोचनानि रौद्राणि अभवन्। कविभिः विचारकैः विद्वद्भिः लैखकैः च रणदुन्दुभिरिव वाचक् प्रवाहितम्। सर्वतः अग्निकणाः प्रस्थापिताः। इष्टकायाः प्रत्युत्तरं प्रस्तरेण प्रदातुं श्रीगणेशः कृतः। मातुः भारत्याः स्वतन्त्रतायै अग्निकणाः ज्वालारूपाः अभवन्। अनया ज्वालया आङ्गलशासनं वपुषा मनसा दग्धीभूतम्।

आङ्ग्लशोषणनीतेः प्रत्यक्षो विरोधः आरभत। मातुः भारत्याः प्रियवराः युववीराः आङ्ग्लनिद्रां नाशितवन्तः। स्वातन्त्र्यनादेन नगरमण्डलवीथ्यः गुञ्जिताः। तत्र आङ्ग्लदमनप्रग्रहप्रहारः प्रारब्धः। ताः दग्धबीजभूताः ज्वालाः क्रान्तिवीरमार्गदर्शकाः कुर्वत्यः अभवन्। प्राणत्यागमन्त्रेण रणाङ्गणे आपतिताः आसन् युववीराः। मुखे तेषां सूत्रमासीत् स्वतन्त्रतायाः, हस्ते च मातुः भारत्याः ध्वज आसीत्। आङ्ग्लशासनकारागृहप्रेषितानां केषाञ्चित् युववीराणां पराक्रमप्रत्याघातशब्दः कारागृहभीतौ एव विलीनः स्यात्। तेषां तिस्रः तिस्रः वंशपरम्पराः मातुः भारत्याः स्वतन्त्रतायै प्राणत्यागमन्त्रं स्वीकृत्य समागताः आसन्। केसरीसिंहः

चारणः तेषु अन्यतमः। पित्रा कृष्णसिंहेन मातृभूमिमुक्त्यर्थं रणगीतानि प्रवाहितानि। केसरीसिंहेन प्रचण्डदुन्दुभिप्रहारः कृतः तस्य प्रतिध्वनिः राजपूतानां कोणे कोणे गतः। पुत्रः प्रतापस्तु लोकमनोबलप्रज्वालितभानुः। विस्फोटकाभियोगे अस्योपरि दमनप्रभञ्जनवृष्टिः कृता। कारागृहप्रकोष्ठे वीरप्रतापस्य आत्मतेजसः प्रकाशः आसीत्। आङ्ग्लानां पुरतः नतशिरः न भविष्यामि इति प्रतिज्ञया सह तस्य मस्तकं कदा पर्यन्तं तस्मिन् कालप्रकोष्ठे अटलं स्यात्? कारागृहाधिकारिणः विहाय तत्र नासीत् कोऽपि साक्षी। कारागृह एव सः मारितः क्रान्तिवीराणां नामादर्शनत्वात्। एतादृश्यः बहव्यः कथाः भूमौ निर्गलिताः अभवन्।

स्वतन्त्रताप्राप्त्यर्थं एतादृशाः बहवः रणवीराः स्वातन्त्र्यज्ञबलिवेद्याम् आहूताः। तेषां साहाय्यं नास्ति न्यूनम्।

शासनस्थिरीकर्तुम् आङ्ग्लाः मृत्युभयहीनाः अभवन्। केसरीसिंहस्य कारागृहमुक्तेः अनन्तरं भारतक्षितिजेषु अहिंसासूर्यरश्मिभिः प्रकाशः प्राप्तः। एतादृशैः क्रान्तिवीरैः नूतनः मार्गः प्राप्तः।

राजपूतानायां केसरीसिंहः इति नामहुँकारमात्रेण राजानः आङ्ग्लाश्च विचलिताः भवन्ति स्म। केसरीसिंहः न केवलः कविः अपि तु शाहपुराराज्यस्य राजकविरपि आसीत्। तस्य सरफरोशी इति भावनाप्रकटीकरणाय विविधसन्दर्भग्रन्थानतिरिच्य फतेहसिंहमानवेन तथा डॉ. कनैयालालराज-पुरोहितेन उपलब्धकृतपत्राण्यपि – काव्यान्यपि भाषान्तरं कृत्वा उद्धृतानि कृतानि। अजमेरस्थ-फतेहसिंहमानवेन केसरीसिंहसन्दर्भे आवश्यकसाहित्यादीनाम् उपलब्धिः कारिता, अतः तस्मै आभारं ज्ञापयामि।

- शिवदानगढवी

३७, शाकुन्तलबंगलोझ
सोलारोड, घाटलोडिया
कर्णावती - ३८००६१

अनुवादकनिवदेनम्

गुजरातसर्वकारेण भारतस्वातन्त्र्यस्य क्रान्तिवीराणां जीवनचरितं पराक्रमवर्णनं च गुजरात्या साहित्य-अकादमी-गांधीनगरद्वारा करणीयमित्यपेक्षितमासीत्। तामेवापेक्षां स्वीकृत्य नैके लेखका: अनुवादकाश्च एकमेकं क्रान्तिवीरजीवनचरितं ग्रन्थीकृतवन्तः सरफरोशश्रेणिमाध्यमेन। श्रीसोमनाथसंस्कृतविश्वविद्यालयाऽप्यपेक्षामिमां स्वीकुर्वन् तान्येव गुजरातीभाषायाऽलेखितानि पुस्तकानि संस्कृतेन अनुवादितानि भवेयु: इति सङ्कल्पितवान्। पूर्वमपि तैः विरचितानि पुस्तकानि संस्कृतेन अनुवादं कारयित्वा प्रकाशितानि विश्वविद्यालयेन। अस्मिन् अवसरे मयाऽपि पुनः अन्यस्यैकस्य पुस्तकस्य अनुवादं कर्तुं निर्णयः कृतः, मान्यानां कुलपतिवर्याणां प्रो. वेम्पटि-कुटुम्बशास्त्रिणां प्रेरणया।

पुस्तकेऽस्मिन् राजस्थानस्थ-क्रान्तिवीरचारणकवि-केसरीसिंह-बारहठस्य जीवनचरितं तस्यैव स्वातन्त्र्यसंग्रामवर्णनेन तथा च स्वातन्त्र्यकाव्यसाहित्येन सह वर्णितमस्ति। तत्र प्रयोगवैविध्यं शब्दसम्पदं मदीयम् अल्पज्ञानं च जानतापि मया अनुवादकार्यम् अङ्गीकृतम्, अयं च चारणकविः क्रान्तिवीरोऽपि एवं तस्य जीवनचरितं केवलं गुजराते वा राजस्थाने न, अपि तु सम्पूर्णे भारते विश्वस्मिन् वा प्रसिद्धं प्रसारितं च भवेत् इति धिया।

तत्र राजस्थानभाषया तथा हिन्दीभाषया केसरीसिंहेन लिखितदोहाकाव्यानि तथैव संरक्ष्य, तेषां संस्कृतभावानुवादः कृतः, परन्तु पुस्तकस्यान्ते प्रदत्त-केसरीसिंह-साहित्यं तथैव रक्षितम्, तस्य संस्कृतानुवादः न कृतः। अनुवादकार्ये केचन शब्दाः संस्कृतप्रत्ययप्रयोजनेन

तथैव स्वीकृताः, तत्र तत्समानार्थकशब्दाभावः कारणम् इति न, अपि तु तत्राभिलषितः भावः अर्थश्च समागच्छेत् इति प्रयत्नः अथवा ममैवैषा मर्यादा-अशक्तिः अवगन्तव्या वाचकैर्पाठकैरनुभावकैस्समालोचकैश्च। अस्मिन् अनुवादकर्मणि साहाय्यं ये कृतवन्तः तेभ्यः संस्कृतविषये महान्तमादरभावं वहद्भ्यः ज्येष्ठेभ्यः गुरुभ्यश्च सादरं सगौरवं भूयो भूयः कृतज्ञताः समर्पयामि।

-अनुवादकः
डॉ. ललितः पटेलः

॥ अनुक्रमणिका ॥

*

केसरीसिंहस्य विषये.....

* मेवाडपतिः महाराज फतेसिंह ! भवान् हिन्दभास्करो विमृश्य आंग्लतारको भवितुं प्रस्थितः अस्ति । प्रत्यागच्छतु, इयं मेवाडभूमिः खेदमनुभवति ।

- लॉर्डकर्झनस्य सभागमनात् पूर्वं मेवाडपतये उक्तकाव्यात्

* प्रताप ! त्वं क्रान्तिवीराणां नामानि वदिष्यसि तर्हि कारागृहात् निर्गत्य प्रथमया भुशूण्डिगुलिकया तव वक्षस्थलं वेत्स्यामि ।

- क्रान्तिवीराय पुत्राय कारागृहात् अकथयत् ।

* केसरीसिंहस्य सिंहहुँकारमात्रेण राजपूताः (क्षत्रियाः) तथा मध्यभारतस्य वरिष्ठाः आंग्लाधिकारिणः व्यग्राः भवन्ति स्म ।

- चारणीसाहित्यविद्वान् एवं केसरीसिंह-
दृष्टा खेतसिंहजी मीसण - मोढेरा

* राजस्थाने क्रान्तिकारिकाले तृतीयस्य चतुर्षु भागत्रयं शाहपुरायाः एकस्य केसरीसिंहचारणकुटुम्बस्यासीत् ।

- इतिहासविद् प्रा. खडगावतः, राजस्थानम्

* केसरीसिंहस्य कारागृहजीवनस्य तपः अरण्यनिवासिनाम् ऋषीणाम् अपेक्षयाऽप्यधिकमासीत् ।'

- राजा दुर्जनसिंहजावबी (अलवर)

* यस्य तिस्रः वंशपरम्पराः मातृभूमिमुक्त्यर्थं आङ्ग्लानां निद्रां नाशितवत्यः । ते आसन् कृष्णसिंहः केसरीसिंहः प्रतापसिंहश्च ।

– पण्डितः ज्ञाबरमलशर्मा

१

क्रान्तिवीरस्य वाणीप्रभावः

(अहं देहलीसभां न गमिष्यामि)

राजस्थानस्य जयपुरनगरे ठाकुरकर्णसिंहस्य प्रासादे प्रभातकाले त्रयः जनाः भारतीयानां गौरवविषये, नृपाणां मान–मर्यादाविषये च क्षात्रधर्मम् उररीकृत्य देशात् आङ्ग्लजनानां निष्कासनाय चर्चां कुर्वन्ति स्म। राजस्थानम् इत्युक्ते क्षत्रियाणां जायायाः पितृगृहं मन्यते। समग्रे देशे आंग्लशासनस्य पताका विलसति स्म। देशे आंग्लनिष्कासनवायुः बलेन प्रावहत्। विशेषतः बंगाले तस्य उष्णता आगता।

एतादृशे काले कर्णसिंहस्य प्रासादे तिस्रः व्यक्तयः समग्रे भारतवर्षे चिन्तायां निमज्जिताः आसन्। तत्र प्रथमः तत्रत्यः ठाकुरकर्णसिंहः द्वितीयः क्रान्तिकारिविचारमानसः राष्ट्रियवर्णलिप्तः चारणः कविः केसरीसिंहः तृतीयः राव–उमरावसिंहः चासीत्।

तस्मिन् समये हिन्दसर्वसत्ताधीशः लोर्डकर्झनः वायसरोय आसीत्। तस्य नीति–रीति–योजनानां कारणेन तासां तिसृणां व्यक्तीनां निद्रा अपगता। तासां चित्तानि अनेन विचारस्फुल्लिङ्गेन प्रज्वालितानि। तत्रापि केसरीसिंहः तु क्रान्तिवीरः। वेदनया अनया तेषां हृदयम् उद्विग्नं सञ्जातम्। राजानः वर्षाणि यावत् पराधीनतायाः जलं पीतवन्तः। अत एव क्षत्रियधर्मस्य नीतिं परम्परां वीरतां च विस्मृतवन्तः। क्षत्रियधर्मसंस्थापनाय नूतनयुगवारिसिञ्चनाय च केसरीसिंहः कार्यं स्वीकृतवान्।

तस्य मनसि दृढः विश्वासः आसीत् यत् क्षत्रियाणां रक्तेषु मातृभूमये

मृत्युमन्त्रः सञ्चरति स्म। युद्धं कर्तुं कौशलम् आसीत् तेषाम्। ते रणशूराः। मृत्युपर्यन्तं वचनेन अविचलिताः तेषां पूर्वजाः।

रामायणकालात् तथा पाण्डवकृष्णादीनां कालात् तेषु क्षत्रियेषु वंशपरम्परायाम् इदं वीरत्वप्रवाहः प्रावहत्। आङ्ग्लशासनं विस्मरणं कारितवान् अस्य सर्वस्य। अनेन कारणेन आगतायां क्षत्रियजागरुकतायां देशात् अविलम्बेन आंग्लजनानां बहिर्गमनं भविष्यति। अनेन विचारेण ते यथा शिक्षिताः भवेयुः तथा प्रयत्नं कृतवान् सः। शङ्खनादः कृतः जागरणाय।

कर्नलवोल्टरद्वारा प्रस्थापितां क्षत्रियहितकारिणीं सभामेव मञ्चीकृत्य केसरीसिंहः क्षत्रियान् हीनकक्षायाः परिस्थितेः बहिः आनयनाय श्रीगणेशं चकार।

एकस्मिन् भाषणे सः कथयामास यत्– "ईश्वरस्य सदनात् कस्याश्चित् ज्ञातेः जातेः वा राज्यं कर्तुम् अधिकारः न प्राप्यते। अखिलमेव शक्तेः क्रीडा। अयं संसारः शक्तेः एव उपासकः वर्तते। शक्तिः स्वभक्तस्य हस्तबले एव निहिता विद्यते। युष्माकं पूर्वजाः शक्तेः अभेदभक्ताः आसन्। शक्तेः अयं निर्झरः अद्य शुष्कः निरस्तः च अभवत्।"

नवयुवकेषु राष्ट्रभावना पूरणीया यतः तेषु वास्तविकतायाः स्वस्येतिहासस्य च ज्ञानं स्यात्। संस्कृत्याः अवगमनं च भवेत्। स्वाभिमानस्य तथा देशभक्तेः सिञ्चनं यथा भवेत् तथा शिक्षणं दत्त्वा तेषां निर्माणाय सः प्रयतते स्म।

तेन ख्रिष्टाब्दस्य १९०४–१३ तमे काले राष्ट्रियशिक्षणस्य काश्चित् योजनाः अपि निर्मिताः। लघुदेशे जापाने सञ्जाता वैज्ञानिकी प्रगतिः केसरीसिंहं प्रभावितवती। सः राजपूताना तथा सेन्ट्रल इन्डिया एज्युकेशनल एसोसियेशन फोर टेक्निकल एज्युकेशन इत्यस्य रूपरेखाम् अपि सज्जीकृतवान्। छात्रान् जापानप्रेषणायाऽयं प्रयत्नः आसीत्। ततः शिक्षणं प्राप्य प्रत्यागत्य छात्राः देशोत्थानं कुर्वन्तु, स्वतन्त्रराष्ट्रस्य विचारधारां सफलीकुर्वन्तु इति उद्देश्यम् आसीत्।

खिष्टाब्दस्य १९१३ तमे क्षात्रपरिषदः योजनाम् अपि सः चकार । राजस्थानस्य साहित्यकारस्य डॉ. कनैयालालस्य मतानुसारं इदं तु क्षत्रियजात्याः व्याजेन भारतीयाणां कृते एव आह्वानं कृतमासीत् । जोधपुरस्य राजमुद्रणालये तस्य मुद्रणम् अभवत् । आंग्लजनानां दृष्ट्या तत्र राजद्रोहः इति । अनेन कारणेन जोधपुरस्य महाराजस्य तथा तस्य मन्त्रिणः सरप्रतापस्य उपरि बाधा आगता । भयात् तौ केसरीसिंहस्य विरुद्धे तथा आंग्लसर्वकारस्य पक्षे तस्थतुः ।

क्षत्रियेषु वीरत्वस्य जागरणाय, स्वदेशाभिमानाय, क्षात्रधर्माय तथा एतादृशकार्येभ्यः सः आन्दोलनं चकार । किन्तु तस्मिन् समये तेषु पराधीनविचाराणां, व्यसनानां, निस्तेजसः, षड्यन्त्राणां, भीरुतायाः च गृहमासीत् । तेभ्यः तेषां बहिरानयनं तु दुष्करमेवासीत् । तथापि जागृत्यर्थं सः प्रयत्नशीलः आसीत् । सः दृष्टवान् यत् सत्तापरिवर्तनेन विना राष्ट्रियोत्थानं दुष्करमेव । एतादृशी विचारधारा तथा वास्तविकी परिस्थितिः केसरीसिंहम् आत्मनः इव प्रतिज्ञाबद्धस्य बुद्धियुक्तस्य साहसिकस्य च जनस्य शोधं प्रति नीतवती । परिष्कृतवादस्य एतादृशं स्वरूपं विलोक्य सुधारकः (परिष्कृतकर्ता) केसरीसिंहः क्रान्तिं प्रति पादं न्यस्थापयत् ।

अथ केसरीसिंहस्य हृदये उल्कापातः भवति स्म । लॉर्डकर्झनः आंग्लजनानां पताकाबलसत्ताप्रदर्शनाय ईंग्लॅन्डप्रदेशस्य सप्तमस्य एड्वर्डमहोदयस्य राज्याभिषेककाले तं महोदयम् आंग्लशासनशक्तिद्वारा भारते प्रभावितं कर्तुं देहल्यां महीपतीनां तथा अन्येषां प्रतिष्ठितजनानां भव्यातिभव्यसम्मेलनस्य आयोजनं चकार । समग्रस्य भारतस्य राजानः आंग्लशासनतले सन्ति इति प्रदर्श्य एड्वर्डमहोदयाय स्वबुद्धिदर्शनं कारयितुम् अभिलषति स्म ।

खिष्टाब्दस्य १९०३ तमस्य फरवरीमासस्य प्रथमदिनाङ्के आयोज्यमाणस्य सम्मेलनस्य कृते लॉर्डकर्झनः निमन्त्रणपत्राणि प्रेषितवान् । अत्र 'निमन्त्रण' इति शब्दस्तु नाममात्रमेव, तत्र आज्ञा एव अभिप्रेता आसीत् । तत्र राजभ्यः पदवीदानमपि दीयते इति लोभवचनमपि प्रदत्तम् । येन केन

प्रकारेण लॉर्डकर्झनः स्ववैभवं देहलीसम्मेलनं कृत्वा ऐच्छत्।

समग्रे भारते येषां ध्वजः विलसति तेषां निमन्त्रणस्य अस्वीकारस्तु कोपभाजनरूपः इति स्वाभाविकमेव। भारतस्य राजानः आंग्लसम्मेलनं गमिष्यन्ति इति विचार्य राष्ट्रियभावनया परिलिप्ताः जनाः आश्चर्यमनुभूतवन्तः। भारतस्य राजानः अनया रीत्या वैभवयुतं शासनसम्मेलनं प्रति गच्छन्ति इति विचिन्त्य ते उत्थितरोमाः सञ्जाताः।

मेवाडाधिपतिः फतेसिंहः (ख्रिष्टाब्दः १८८४–१९३०) अस्य सम्मेलनस्य यदा वार्तां प्राप्तवान् तदा सः विरोधं कृतवान्। यतः ख्रिष्टाब्द १८१८ तमे सः आंग्लजनैः सह समयबद्धताम् अकरोत्, तदनुसारं तत्र गन्तुं सः प्रतिरोधं चकार। षोडशशताब्द्याम् अकबरस्याग्रेऽपि मेवाडपतिः नतमस्तकः न अभवत्। लॉर्डकर्झनः तं नतमस्तकं द्रष्टुमिच्छति स्म, तत्र च गौरवमनुभवितुमिच्छति स्म। कर्झनः यदा ज्ञातवान् यत् मेवाडनरेशः फतेसिंहः सम्मेलनं न आगमिष्यति तदा सः निषण्णः सञ्जातः। प्रज्वलितहृदयः सः चिन्तितवान् – एडवर्डमहोदयस्य आगमने सति मेवाडनरेशस्य अनुपस्थितिस्तु अनर्थाय।

उद्विग्नमनः कर्झनः तं राज्यशासनात् च्युतं कर्तुं योजनाम् आरभत। बलेन कार्यं साधयितुम् असफलः सः कूटनीतिमाश्रित्य मधुरैः शब्दैः महाराजमनुरञ्जितवान्। दूतं प्रेषयित्वा स कथयामास यत् "अनागते महाराजे सति वाइसरॉयमहोदयः दुःखी भविष्यति। पुनश्च वयं तु पदवीप्रदानेन भवतः सम्माननं कर्तुम् इहामहे।" समयबद्धतां कृत्वा अनेन लोभेन फतेसिंहः देहलीं गन्तुं चिन्तयामास। हृदयेऽपि अनिश्चिततायां सः ओमिति उक्तवान्। समग्रे राजस्थाने वायुवेगेन इयं वार्ता प्रसृता। सर्वत्र निस्तब्धता अभवत्। यस्य पूर्वजाः कदापि नतमस्तकाः न बभूवुः तथा च राणाप्रतापस्य अभिधानमात्रेण समग्रस्य भारतस्य क्षत्रियाणां शिरांसि उन्नतानि सन्ति, तस्य वंशजोऽयं फतेसिंहः कालेऽस्मिन् आंग्लजनानां पुरतः नतमस्तको भूत्वा देहलीं गच्छति। नगराणां जनाः एवञ्च विशेषतः स्वतन्त्रतायाः विचारमन्त्रद्रष्टारः खिन्नाः अभवन्।

हिन्दूनां हृदयानि प्रज्वलितानि! विश्वासमेरुदण्डः भग्नः।

अनेन कारणेन एव जयपुरे त्रयः जनाः मिलित्वा विचाराणाम् आदानप्रदानं कुर्वन्ति स्म। तेषाः पुरतः किं कर्तव्यमिति महाभारयुक्तः प्रश्नः मतौ विप्रतिपत्तिं जनयति स्म। अप्राप्ते समाधाने ते चन्द्रपोलमहाद्वारस्य बहिः स्थितस्य मल–मीसर–ठाकुरभूरसिंहस्य हर्म्यं प्रापुः।

यदा ते तत्र प्राप्तवन्तः तदा तेषां दृष्टिपथि आगताः ठाकुरभूरसिंहः रावगोपालसिंह-खरवा, हरिसिंह-लाडखानी, सजनसिंह-खण्डेला च।

केसरीसिंहः तेषां पुरतः मेवाडनरेशस्य देहलीगमनविषये उवाच।

वयमेव तदेव चिन्तयन्तः आसन् इति उक्त्वा मलसीरठाकुरः समेषां हृदयभारं न्यूनीकृतवान्।

'अल्पः कालः कठिनं च कार्यम्। किमपि उपायं न प्राप्तवन्तः, अतो वयं भवतां समीपमागताः स्मः' इति आगन्तॄणाम् एक उवाच। पिहितानि प्रासादद्वाराणि आसन्। शनैः शनैः चर्चाः भवन्ति स्म। रावगोपालसिंहः क्रान्तिवीराणां मार्गदर्शकः आसीत्। सः सर्वेषां पुरतः एकं प्रस्तावं स्थापयामास यत् – "देशेऽस्मिन् विपत्तिकाले राजकुलमार्गदर्शकरूपेण स्वप्रतिभासम्पन्नवचोभिः चारणाः अग्रेसराः बभूवुः। नृपान् कटुवचोभिः सत्यं प्रति नीतवन्तः, इदानीं राजानः अपि तेषां सम्माननं कुर्वन्ति। अत एव मम मतानुसारं केसरीसिंहेन इदं कार्यं स्वस्कन्धे वोढव्यम्।" एकस्यां दृष्टौ केसरीसिंहः यथा भारतवर्षस्य क्षत्रियाणां मापनं कुर्वन् आसीत्। सः तेषां बलोपरि कौशलोपरि च गौरवमनुभवति स्म। आंग्लशासनस्य अङ्गारकाः तं प्रज्वालयन्ति स्म। सर्वेषां मुखमण्डलानि उदितः सूर्य इव विकसितानि बभवुः।

विना विलम्बेन कविः केसरीसिंहः तत्रैव लेखनीं कर्गजं च हस्तयोः अस्थापयत्। तत्क्षणमेवायं आशुकविः त्रयोदशकाव्यानि अरचयत्। अनन्तरम् एकमेकं काव्यं (सोरठं) यथाक्रमं पठित्वा व्याख्यां चकार। उपविष्टाः श्रोतारः अस्य काव्यकामिन्याः विलासं दृष्ट्वा प्रीताः बभूवुः। एतानि काव्यानि केवलं शब्दानां गुम्फनं न, अपि तु राष्ट्राय उपप्लुतहृदयस्य कवेः पीडा, स्वतन्त्रतायै

तीव्रोहा राजपूतशक्त्योत्थानाय आह्वानं च आसन्। कवेः हृदयात् निर्गतानाम् एकैकशब्दानां बलेन गोपालसिंहः अचिन्तयत् यत् अस्य काव्यस्य श्रवणेन अवश्यमेव महाराजस्य फतेसिंहस्य हृदयपरिवर्तनं भविष्यति। यावत् महाराजः देहलीं प्राप्नोति तस्मात् पूर्वं कथंचित् एतां कवितां पठेत् इति कार्यस्य उत्तरदायित्वं स्वीकृतवान् गोपालसिंहः। एतत् वृत्तं गोपालसिंहेन भ्रात्रियाय खेतसिंहाय लिखिते पत्रे सम्प्राप्यते।

महाराजः फतेसिंहः तस्मिन् समये उदेपुरात् विशेषयानेन देहलीं गन्तुं प्रस्थितः आसीत्। एतत् सोरठप्रकारकं काव्यं फतेसिंहाय दातुं गोपालसिंहः व्यवस्थां चकार। रेलयानस्य पृष्ठे अन्यव्यवस्थां कृत्वा फतेहसिंहस्य नसीराबादस्थानके मेलनम् अभवत्।

महाराजस्य दृष्टिः काव्येन सह आगन्तुः जनस्योपरि अपि पतिता, शीघ्रमेव तेन सूचितम् किं निवेदनम्? वदतु।

"केसरीसिंहः एतानि सोरठप्रकारकाणि काव्यानि भवते प्रेषितवान् अस्ति। एवञ्च देहलीं प्रापणात् पूर्वं तानि पठितव्यानि इति निवेदनं कृतवान् अस्ति।" महाराजस्य ध्यानं तत्र केन्द्रितम् अभवत्। यथाक्रमं सः काव्यानि पठन् आसीत् तथा तस्य मुखमुद्राणां परिवर्तनं जायते स्म। महाराजः गहनेषु विचारेषु यथा निमग्नः। पठित्वा स कथयामास यत् – "एतानि दुहाकाव्यानि यदि अहं उदेपुरे अप्राप्स्यं तर्हि देहलीं गन्तुं मम प्रस्थानमेव न स्यात्।" एतच्छ्रुत्वा श्रोतुः वदनोपरि उल्लासकुसुमानि विकसितानि अभवन्।

देहल्यां विश्रमालयं सः प्राप्तवान् किन्तु देहलीदरबारगमनाय किं कर्तव्यम्? इति प्रश्नः आसीत् मनसि। तस्मिन्नेव समये कानोतामायाः ठाकुरः नारायणसिंहः तथा तेन सह गुप्तवेशे अलवरनरेशः फतेसिंहः तत्र प्राप्तवन्तौ। तौ महाराजं सूचितवन्तौ यत् भवान् यदि घोटकेन उदेपुरं गन्तुं विचारयति चेत् तदर्थं व्यवस्थां कुर्वः। शब्दान् श्रुत्वा ध्यानं च दत्त्वा महाराजः जिज्ञासया प्रश्नं कृतवान् यत् – 'का व्यवस्था'?

देहलीतः बसवापर्यन्तम् अलवरराज्यं, वसवातः जहाजपुरपर्यन्तं

जयपुरराज्यं, जहाजपुरतः चित्तोडपर्यन्तं गोपालसिंहः खरवा व्यवस्थां करिष्यति। प्रत्येकं स्थले वाजिनां व्यवस्था वर्तते। देहलीस्थां सर्वव्यवस्थां रसप्रतापः द्रक्ष्यति। एतावत्संवादेषु एव क्षणान्तरं निर्णयः कृतः। विशेषयानम् उदेपुरं प्रति नेतुं सूचना प्रदत्ता। महाराजस्य हृदये केसरीसिंहस्य काव्यशब्दाः पीडां जनयन्ति स्म। किमपि मया असत्यम् आचरितमिति भावः अन्तःकरणं पीडयति स्म। पुनः कवेः काव्यस्योपरि दृष्टिपातम् अकरोत् तेन मारवाडीभाषया लिखिताः दोहाः (काव्यानि) तथापि सः चारणीं शैलीं सोरठीलक्षणं चाभिव्यनक्ति।

'देखेला हिंदवाण, जिन सूरज दिस नेह सुं,
पण तारा प्रमाण, निरख निसासा नाखशे?–१

(हिन्दप्रजा स्वसूर्य (भवन्तं) प्रेम्णा पश्यन्ति। आंग्लजनाः पदवीप्रदानेन सम्मानितवन्तः इति श्रुत्वा प्रजाः नैराश्यं प्राप्स्यति)

एवम् एकैकं काव्यं तस्य हृदयं दुःखीकरोति स्म। तस्य समक्षं महाराणा-प्रतापः केसरीसिंहस्वरूपेण यथा तर्जयति इति भासते स्म।

पग पग भम्या पहाड, धरा छोड राख्यो धरम्
महाराणार मेवाड, हिरदै बसीया हिंद रे–२

(निजधर्मरक्षणाय मेवाडभूमिं परित्यज्य पर्वतान् लङ्घितवान्। तत्मेवाडराज्यं तथा मेवाडपतिः अद्यापि हिन्दप्रजाहृदि निवसतः।)

घण घाल्या घमसाण, राण सदा रहिया निडर
(अब) पेखंता कुरमाण, हलचल किम फतमल हुवै–३

(बहूनि युद्धानि अभवन् तथापि महाराजः प्रतापः निर्भयः आसीत्। अद्य आंग्लाज्ञया फतेसिंहः किमर्थं विचलितो जातः।)

गिरद गजां घमसाण, नहचै धर माई नही
मावै किम महाराणा, गज दो सैरा गिरद में–४

(यस्य गजानां घर्षणेन उड्डिता धूलिः पृथिव्यां न समायाति, सः महाराजः द्विशतं गजानां संमर्दे कथं समायाति?)

अवरां ने आसाण, हाकां हरबल हालणौ,
किम हालै कुलराण (जिण) हरबल शाहां हाकियां ।–५

(अन्येषां नृपाणां कृते इदं सरलं स्यात् यत् आशां पालयन् ते राजोपवेशने अग्रेसराः भवेयुः, किन्तु राणाकुलवंशजः राजा तत्र कथं चलेत् यतः सः तु बादशाहं चालितवान् आसीत्।)

सिर जुकिया शहंशाह, सिंहासण जिण सामनै,
(अब) रणणौ पंगत राह, फाबै किम तो नैफता?–६

(यस्य सिंहासनस्य सन्मुखे अन्येषां शिरांसि नतानि सन्ति। अथ हे महाराज फतेसिंह! तस्यां पङ्क्तौ स्थातुं भवते कथं रोचिष्यते?)

नरियंद सह नजराण, झुक फरसी सरसी जिकां,
(पण) प्रसरेलो किमपाण, पाण छतां थारौ फता ।–७

(अन्ये राजानः नत्वा नत्वा उपहारं धरिष्यन्ति तत्तु तेषां कृते सरलमस्ति, किन्तु हे फतेसिंह, भवतः हस्ते कृपाणे सति हस्तः कथम् उपहारं धरिष्यति?)

सकल चढावै सीस, दान धरम जिणरो दियौ,
सो खिताब बखसीस, लेवण किम ललचावसी ।–८

(यस्य दत्तानि दानानि सर्वे जनाः मूर्ध्नि स्थापयन्ति, ते हिन्दुपतयः पदवीं पुरस्कारं च प्राप्तुं किमर्थं लोलुपाः भवन्ति।)

देखे अंजस दिह, मुल्कलो मन ही मनां,
दंभी गढ दिल्लीह, शीस नमंतां शीश वद–९

(हे सिसोदीया, (फतेसिंह), दम्भयुक्तं देहलीदुर्गसमक्षं नतमस्तकं भवन्तं दृष्ट्वा ते (शासकाः) मनसि आनन्दमनुभविष्यन्ति। तद्दिवसः तेषां कृते अभिमानस्य।)

अन्त बेर आखीह, पातल जे बातां पहल,
(वे) राणा सह राखीह, जिणरी साखी सिर जटा–१०

(महाराणा प्रतापः अन्तकाले यां प्रतिज्ञां कृतवान् तां प्रतिज्ञां सर्वे राणाराजानः पालितवन्तः। तस्य साक्षीभूता भवतः मस्तके स्थिता जटा वर्तते।)

कठिण जमानो कौल, बांधे नर हिम्मत बिना,
(यो) वीरां हंदो बोल, पातल सांगै पेखियौ –११

(शौर्यविहीनाः नराः कथयन्ति यत् संसारः परुषः, किन्तु वीराणां वचांसि राणाप्रतापः तथा राणा सांगा एव पालितवन्तौ।)

अबलग सारी आस, राण रीतकुल रांखसी,
रहो स्याह सुखरास, एक लिंग प्रभु ओपरे–१२

(इदानीं एका-आशा वर्तते यत् महाराणा स्वकुलनीतिं रक्षिष्यति। सुखे भगवान् एकलिङ्गः भवते साहाय्यं कुर्यात् (इति मे प्रार्थना)।

मान माद सीसोद, राजनीति बल राखणो
(इ) गवरमींटरी गोद, फल मीठां दीठां फता?–१३

(हे सिसोदीया (फतेसिंह)! स्वमानः आनन्देन राजनीतिशक्त्या हि रक्षणीयः भविष्यति। अस्य सर्वकारस्य उत्सङ्गे कदापि स्वादुः फलं दृष्टं वा?)

महाराणा फतेसिंहः एतेषु कटुदुहाकाव्येषु स्वकुलगौरवम् अवगतवान्। फतेसिंहस्य समक्षं विद्यमानेभ्यः पर्वतेभ्यः यथा राणा प्रतापः सिसोदीयाकुलनीतेः घोषणां करोति स्म। कुलमिदं नतमस्तकं भविष्यति इति विचारैः तस्य अन्तःकरणं संघर्षं कुर्वत् आसीत्। केसरीसिंहस्य ओजस्विकाव्यरचनाभिः तस्य हृदयं दुःखीभवति स्म।

ख्रिष्टाब्द १९०३ तमस्य फरवरीमासस्य प्रथमे दिनाङ्के देहलीसम्मेलनं भवत् आसीत् तस्मिन् समये सर्वाणि दुहाकाव्यानि अधीत्य फतेसिंहः निर्णयं कृतवान् यत् 'अहं देहलीसम्मेलनं न गमिष्यामि, एतत्श्रुत्वा श्रोतारः गौरवमनुभूतवन्तः। आयोजनानुगुणं सूचनाः प्रापिताः। सत्ताधीशस्य विचाराः परिवर्तिताः कविकाव्यप्रभावात्।

यस्मिन् समये लॉर्डकर्झनस्य सम्पयमाने सम्मेलने तस्य दृष्टिः मेवाडनरेशस्य रिक्तासने अपतत्। तेन तस्य हृदि उत्पन्ना पीडा, तस्य मुखोपरि प्रसृता। साम्राज्यवादतले नृपाणां श्रृंखला अस्ति इति दम्भः अपगतः।

कवेः केसरीसिंहस्य 'चेतावणी रा चूंगट्या' इति काव्यशब्दानां शक्तिः

आसीत् । मेवाडपतिः उपहारैः सह लॉर्डकर्झनस्य पुरती नतमस्तको भविष्यति इति आशा त्रुटिता । एकस्य क्रान्तिवीरस्य चारणकवेः शीघ्ररचितया रचनया भूपतेः विचाराः परिवर्तिताः तदपि तस्मिन् समये अभवत् यस्मिन् समये आंग्लशासनस्य भूयः प्रभावः आसीत् । कवेः अन्तःकरणे मुहुर्मुहुः आलोठ्य प्रगटीकृते काव्येऽस्मिन् नूतनविचाराणां शक्तिः आसीत् ।

मेवाडपतिः महाराज फतेसिंह ! भवान् हिन्दभास्करो विमृश्य आंग्लतारको भवितुं प्रस्थितः अस्ति । प्रत्यागच्छतु, इयं मेवाडभूमिः खेदमनुभवति ।

—केसरीसिंहः

(लॉर्डकर्झनस्य सभागमनात् पूर्वं मेवाडपतये उक्तकाव्यात्)

२

केसरीसिंहस्य कुलं गुर्जरधरा

मातृभूमये प्राणत्यागस्य चिन्तां विहाय समराङ्गणे युद्धरतानां वीराणां तीक्ष्णैर्खड्गैः धरा यथा रक्तवर्णा स्यात् तथा तादृशो वर्णः सूर्योदयात्पूर्वं नभसि पूर्वदिशि आतनोति स्म। अश्मन्युक्तायाः वसुन्धरायाः अरण्यम् आकाशे उड्डीयमानाः पक्षिणः कलरवीकुर्वन्तः गच्छन्ति स्म। सुदीर्घे मार्गे बृहश्तः वृक्षाः न दृश्यन्ते स्म। तादृशभूमौ चित्तोडस्य रावलवंशजः हमीरसिंहः सर्वतः पश्यन् स्वीय-अश्वम् अग्रे नयति स्म। तस्य शिरसि मेवाडस्य उष्णिक् मुखवस्त्रबन्धनेन सह तथा उपवस्त्रं धृतमासीत्। कटिप्रदेशे खड्गः लम्बितः आसीत्। मार्गे गोपालयुवकः मेषान् अजाश्च अरण्ये चरतः परित्यज्य स्कन्धे यष्टिं संस्थाप्य दुहागीतं गायन् आनन्देन स्थितः आसीत्। हमीरसिंहः अश्वं पाष्ण्या ताडयित्वा तं प्रति नीतवान् उपगम्य च पृष्टवान्–

'खोडग्रामः कियत् दूरे वर्तते?'

'इदानीं' बहु दूरे नास्ति। अश्वं मुक्तं करोतु अचिरादेव तत्र प्राप्स्यति। वरवडीमातुः दर्शनाय गन्तव्यमस्ति वा? इति गोपालयुवकः स्वानुमानेन पृष्टवान्।

हमीरः तं दृष्ट्वा विस्मयपूर्वकं उक्तवान्– 'त्वं कथम् अवगतवान् यत् मया तत्रैव गन्तव्यमिति। 'तत्र विस्मयकारकं किमपि नास्ति। हलवदराज्यस्य सीमाप्रदेशे स्थितस्य अस्य खोडग्रामस्य चारणवरवडीमातुः नाम समग्रे प्रदेशेऽस्मिन् गुञ्जति। ग्राममध्यात् निर्गतः प्रत्येकं मानवः आशाभाण्डारं नीत्वा

गच्छति। मातुः रोटलो बृहत् वर्तते। दुःखीनां कृते सा प्रथमा जोगमाया आईवरवडी बभूव। अनन्तरं नवघणस्य सैन्यं भोजनं कारयित्वा सा जनानां कृते द्वितीया आईवरवडी सञ्जाता। अयं ग्रामः तस्याः श्वसुरगृहम्। पितृगृहं तु वागडस्य भचाउप्रदेशस्य खोडासर इति ग्रामः। तस्याः आशीर्वादेन दुष्करं सुकरं सञ्जायते इति श्रुतमस्ति। सा मन्त्रं तन्त्रं च न करोति, सा तु साक्षात् जोगमाया। प्रतिदिनं बहवः जनाः तस्याः दर्शनाय समागच्छन्ति अत एव वयम् अवगच्छामः यत् ते निश्चयेन मातुः दर्शनाय गच्छन्ति इति। अन्यथा खोडग्रामे तादृशं किमपि नास्ति यत् जनाः एतां धरां प्रति आगच्छेयुः। अहमपि मातुः ग्रामस्य एव अस्मि।' स्ववचोभिः गोपालः युवकः आईवरवडीं तत्रैव प्रकटीकृतवान्।

हमीरसिंहः स्वाश्वमग्रे नयन् चिन्तितवान् मनसि। गुजरातस्य धरायां यदा पादम् अस्थापयत् तदा एव श्रुतम् आसीत् यत् द्वारकाधीशस्य दर्शनाय गमनसमये मार्गे अस्याः जीवितजोगमायायाः शक्तेः दर्शनं करणीयम् अत एव अयं मार्गः चितः। बापारावलस्य वंशः अद्य छिन्नभिन्नः अभवत्। चित्तोडस्य पुनःप्राप्तिः इदानीं बहु दूरे भाति। अपि च सः कुष्ठरोगेन पीडितः आसीत्। मेवाडं प्राप्तुं किं किं सहनं न कृतं तथापि सर्वं पराजितम्। आशारज्जुः अपि त्रुटिता। अल्लाउद्दीनखिलजी तस्य पितामहस्य रत्नसिंहस्योपरि आक्रमणं कृत्वा मेवाडं सुलतानस्य शासने अस्थापयत् (विक्रमसंवत्–१३५९)। चित्तोडप्रदेशः सुलतानाधीनः इति वार्तां श्रुत्वा महाराज्ञी पद्मिनी तथा तया सह सहस्रं राजपूतनार्यः स्वप्राणत्यागं कृतवत्यः। बहुनां रक्तशूराणां रक्तम् अवहत्। महाराजः लक्ष्मणसिंहः तथा तस्य द्वादशपुत्रेभ्यः एकादशपुत्राः समरे वीरगतिं प्राप्तवन्तः। लक्ष्मणसिंहः स्वस्य अपरं पुत्रम् अजयसिंहं तथा राजकुमारस्य अरिसिंहस्य बालपुत्रं हमीरसिंहं प्रजातन्तुवशात् गुप्तरीत्या अरावल्लीपर्वतं प्रति प्रेषितवान्। अनन्तरं सः सिसोदाग्रामे वसति स्म। हमीरसिंहः युवकः अभवत्। पितृव्यः अजयसिंहः अपि पञ्चत्वं गतः।

चित्तोडराज्यं पुनः प्राप्तुं हमीरसिंहस्य आशायाः उपरि जलं प्रसृतम्। मेवाडप्रदेशः पुनः न प्राप्स्यते इति अवगम्य एतां धराम् अन्तिमवारं प्रणम्य द्वारकाधीशस्य दर्शनं च कृत्वा समुद्रसमाधिः कर्तव्यः इति निर्णयं कृत्वा हमीरसिंहः प्रस्थितवान् आसीत्। एतेषां सर्वेषां विचाराणां प्रभञ्जनं तस्य हृदये भ्रमति स्म। आईवरवडीं नत्वा अग्रे गन्तुं मनः कृत्वा मार्गेऽस्मिन् समागतः। तत्र खोडग्रामस्य गृहाणि दृष्टानि। अश्वात् अवतीर्य अयं राजपूतः अश्वं नीत्वा आईवरवडीमातुः गृहं गतः। कृष्णवस्त्राणि धृत्वा मातुः दीपं प्रज्वाल्य आईवरवडी यत्र उपविष्टा आसीत् तत्र हमीरसिंहः प्रविष्टः। आईवरवडीमातुः चरणयोः उष्णिकम् अवतारितवान्, तदा आई उक्तवती अत्र न, अपि तु जोगमायायाः स्थानके उष्णिकम् अवतारयतु। 'मातः! अत्रभवती प्रदेशेऽस्मिन् जोगमायायाः वरवड्याः अवतारः मन्यते अत एव भवत्याः चरणयोः उष्णिकम् अवतारितवान्। भवत्याः दर्शनाय समागतोऽस्मि। हमीरसिंहः आत्मनः परिचयम् अददात्। भोजनं दत्त्वा आई पृष्टवती– 'कुत्र गन्तुं विचारं कृत्वा मेवाडं त्यक्तवान् अस्ति'?

'आईमातः! इदानीम् अन्तिमा इच्छा द्वारिकाधीशदर्शनस्य वर्तते, अपि च तत्रैव समुद्रसमाधिः स्वीकरणीयः। मेवाडं प्राप्तुं न दृश्यते कश्चन मार्गः। मत्समीपे न सन्ति योद्धारः न च वित्तम्। पुनः कुष्ठरोगः। ईश्वरेच्छा एव बलीयसी। अन्नं जलं च यावत् आसीत् तावद् अस्माकं पूर्वजाः मेवाडधरायाः रक्षणम् अकुर्वन्। इदानीं सुलतानं निष्कासयितुं शक्तिः मयि नास्ति।' दुःखजलमुचः दूरीकृत्य हमीरसिंहः पराजितया शक्त्या स्ववृत्तं न्यवेदयत् एवञ्च पुनः स्पष्टीकर्तुम् उक्तवान् यत्, 'गुजराते यदा पादं न्यस्थापयम् तदा भवती वरवडीमातुः अवताररूपा द्वितीया वरवडी च अस्ति इति श्रुत्वा द्वारिकागमनात्पूर्वं, पूतं भवितुं भवत्याः दर्शनाय समागतोऽस्मि'।

धूपशलाकया आईवरवडीमातुः प्रकोष्ठः वातावरणं सुवासेन पूरयति स्म। समीपे प्राङ्गणे उत्तमाः जातवन्तः घोटकाः हणहणाहटं कुर्वन्ति स्म। महीषीभिः धेनुभिश्च प्राङ्गणं रमणीयं भासते स्म। हमीरसिंहस्य वाणीं श्रुत्वा

आईमातुः वदनोपरि तेजसः रेखाः आगताः। सा मातुः दीपज्योतिं प्रति दृष्टिं कृतवती।

'हमीरसिंह! अस्याः दीपज्योतेः दर्शनं कृतं वा?'

'आम्, मातः।'

'अनया दीपज्योत्या कति ज्योतयः प्रकटीभवन्ति?'

आई पुनः प्रश्नं कृतवती।

'मातः! तस्य गणना भवितुं नार्हति। अनेकाः दीपाः प्रज्वलिताः भवन्ति, तत्र किम् आश्चर्यम्?' हमीरसिंहः सहजतया उत्तरं प्रायच्छत्।

'अद्य मेवाडस्य पितुः रावलस्य वंशः जले निमग्नः भवेत् वा वंशोऽयं नष्टः स्यात् इति न उचितम्। तेषां वीराणां रक्तं तव धमनीषु प्रवहति। हे राजपूत! वयं लज्जाम् अनुभवामः यतः राजपूतः सन् एवं पराजितो भूत्वा हताशमना त्वं समुद्रसमाधिं कुर्याः तस्मिन् दिवसे रविः पूर्वदिशि न, अपि तु पश्चिमदिशि उदेत्। राजपूतस्तु समराङ्गणे मरणमवाप्नोति अन्यथा विजयं विन्दति।' एवम् आई हमीरसिंहस्य आत्मनि चेतनाप्रदीपं प्रज्वालयितुं प्रारब्धवती।

'किन्तु, हे मातः! मत्समीपे न वित्तं, न योद्धारः, न च घोटकाः। पुनश्च कुष्ठरोगपीडितोऽस्मि। सुलतानस्य समक्ष कथं युद्धं कर्तुं शक्नोमि? पुनः हमीरसिंहः स्वनिर्बलतां प्रकटितवान्।

आई वरवडी ध्यानमग्ना इव स्थिरा भूत्वा क्षणान्तरे नेत्रे निमील्य उक्तवती, 'हमीरसिंह! त्वम् अवश्यमेव चित्तोडराज्यं पुनः प्राप्स्यसि। मत्पुत्रः बारुः अश्वानां विक्रेताऽस्ति। कतिपयेषु दिनेषु सः आगमिष्यति। तेन सह पञ्चशतं घोटकाः तथा वित्तं प्रेषयिष्यामि। आलस्यं नैराश्यं च परित्यज। धनं प्राप्य सैन्यं सज्जीकृत्य चित्तोडस्योपरि आक्रम्य स्वशासनं संस्थापय। माता जोगमाया त्वया सह भविष्यति' इति।

'हे मातः! भवत्याः धनं प्राप्नोमि इति अनुचितम्। मया तु भवत्याः चरणयोः किमपि दातव्यं भवति।'

'हे राजन्! अहं न, एतत् तु जगदम्बा ददाति। तुभ्यं वैभवाय एतत् न ददामि, अपि तु मेवाडं पुनः प्राप्य सूर्यवंशस्य वचनरक्षणाय ददामि। त्वं विजयस्व।' आई यथा आशां दत्तवती।

अष्ट–दशदिनेषु आई कासाञ्चित् वनस्पतीनाम् औषधादीनां च उपयोगं कृत्वा कुष्ठरोगस्य उपशमनं कारितवती। हमीरसिंहे यथा पुनः सूर्यवंशस्य रक्तम् उष्णीबभूव। गमनाय सः आईमातुः अनुमतिं स्वीकृतवान्। पञ्चशतघोटकैः सह सा धनं तथा पुत्रं वासम् अपि प्रेषितवती।

द्वारिकां प्रति गन्तुम् उद्युक्तः सूर्यकुलवंशजः युवकोऽयं मेवाडधरां प्रत्यागतवान्। तस्मिन् समये सुलतानपक्षतः चित्तोडस्य शासनं झालोरस्य चौहाणः मालदेवः करोति स्म।

हमीरसिंहः धनं घोटकान् च प्राप्य क्षत्रियाणां सैन्यं सज्जीकृतवान्। मालदेवः आयव्ययविवरणस्य कार्यम् एकस्मै वणिजे दत्तवान् आसीत्। मालदेवः यदा कदा चित्तोडम् आगच्छति स्म। राजा हमीरसिंहः एकैकं कृत्वा चित्तोडस्य ग्रामान् स्वाधीनं कर्तुम् आरब्धवान्। मेवाडस्य बृहत् प्रदेशः तस्याधीनः अभवत्। मालदेवस्य समस्या वर्धिता। मालदेवः स्वकन्यां हमीरसिंहाय यथा दद्यात् तथा कथनं सम्प्रेष्य हमीरसिंहः प्रस्तावम् अस्थापयत्। अनेन सम्बन्धेन हमीरसिंहः तूष्णीभविष्यति अपि च स्वकन्या सूर्यवंशे प्रदत्ता इति गौरवास्पदम् इति मत्वा मालदेवः तथा अकरोत्। पाणिग्रहणं सञ्जातम्। कन्याकथनेन हमीरसिंहः चित्तोडस्य वणिजम् अयाचत। एवं हमीरसिंहः चित्तोडं पुनः प्राप्तवान्।

स्थिरः भूत्वा हमीरसिंहः खोडग्रामात् आईवरवडीं तस्य पुत्रं च आहूय भव्यस्वागतं कृतवान्। यदा हमीरसिंहः आईमातुः चरणयोः उपकारवशात् मेवाडराज्यं दातुम् उक्तवान् तदा सा उक्तवती यत् अहं मत्पुत्रश्च बारुः रावलवंशस्य नीतिरीतिरक्षणाय सुलतानशासनविच्छेदाय च साहाय्यं कृतवन्तौ। धर्मसंरक्षाय संस्कृतिपालनाय च वयं भवतः साहाय्यार्थं स्मः। राज्यं तु भवतः एव, न तु अस्माकं। क्षणं यावत् तयोः निष्पृहतायाः सः वन्दनं अकरोत्।

बारु: देथाशाखाया: चारण: कवि: घोटकानां विक्रेता चासीत्। महाराणाहमीरसिंह: ज्येष्ठभ्राता इव तमनुमन्यते स्म। तम् अवगम्य द्वादशग्रामा: उपहाररूपेण प्रदत्ता:। बारु: घोटकानां विक्रेता आसीत् अत: हमीरसिंह: "सौदा बारहठ" इति सम्बोधनेन तं सम्बोधयति स्म। आई वरवडी स्वग्रामे खोडे दरिद्रेभ्य: भोजनं ददाति स्म तथा यथाशक्ति साहाय्यमपि करोति स्म, अत एव राणाहमीर: चित्तोडस्य दुर्गस्योपरि मन्दिरं निर्माणं कारयित्वा आईवरवडीमातु: स्थापनां कृतवान् एवञ्च अन्नपूर्णारूपेण तस्या: पूजनं प्रारब्धवान्।

अनन्तरं बारु: मेवाडे एव न्यवसत्। देथाशाखाया: अयं चारण: "बारुजी–सौदा बारहठ" इति अभिधानात् प्रसिद्ध: अभवत्। तस्य बहुमानं कृत्वा 'उमराव' इति उपाधिना सम्माननमपि कृतम्। मेवाडस्योपरि पुन: बापारावलवंशस्य पताका विलसति स्म।

अस्य बारुचारणस्य वंशज: कृष्णसिंह: अर्थात् क्रान्तिवीर: कवि: केसरीसिंह:, यस्य कुलस्य मूलं गुर्जरधरायां निहितं वर्तते।

विशेष:

'बारहठ-कृष्णसिंहस्य जीवनचरित्रं, राजपूतानाम् इतिहास: वीरविनोद: इत्येतेषु ग्रन्थेषु संवत् १३५९ तमे अल्लाउद्दीनखिलजी चित्तोडस्य रत्नसिंहं पराजितवान् इति वर्णितमस्ति। 'मातृदर्शनम्' इति संशोधनपुस्तके चारणीसाहित्यसंशोधकेन पींगलशीभाईपायकेन अद्यतनहलवदतालुकाया: (सुरेन्द्रनगरजनपदस्य) खोडग्रामस्य द्वितीयआईवरवडीमातु: काल: संवत् १३४५ त: १४२५ पर्यन्तं दर्शितो वर्तते। तत्र हमीरसिंहस्य काल: संवत् १३९० त: १४२१ पर्यन्तं दर्शित:। राजपूतानाम् इतिहासे उल्लिखितं वर्तते यत् राणा हमीरसिंह: संवत् १४०० तमे पुन: शासनं प्राप्तवान्। अत्र काले दशवर्षाणां भिन्नता दृश्यते। चितोडस्य दुर्गोपरि अद्यापि आई अन्नपूर्णाजी (वरवडी) मातु: मन्दिरं वर्तते शुशोभते।

चित्तोडस्य राजहर्म्यप्रवेशे भित्तीनाम् उपरि 'वयं धन्यवादान् कुर्म:'

इति उल्लेखं कृत्वा ये चित्तोडस्य साहाय्यं कृतवन्तः तेषां नामानि तत्र टंकितानि वर्तन्ते, तत्र 'आई वरवडी द्वितीया' इति उल्लेखः उपरोक्तां कथां स्मारयति ।

बारुः सोदाविद्वान् साहसिकश्च आसीत् । तस्मिन्नेव वंशे केसा वीरा च युद्धवीरौ अभवताम् । ताभ्यां राणाप्रतापः हल्दीघाटसमरे विश्वासपूर्वकम् अग्रपङ्क्तौ उत्तरदायित्वं दत्तवान् । पराक्रमिणौ योरौ भूत्वा तौ युद्धं कृतवन्तौ । अनन्तरं बारहठ-देवः अभवत् । तस्य चतुर्थे वंशे कृष्णसिंहः सदृशः स्वातन्त्र्यप्रेमी विद्वान् राजकविः अभवत् ।

एवं बारुसदृशः वीरः पराक्रमी बुद्धिमान् विक्रेता तथा आईवरवडी द्वितीया सदृशयोः विभूतयोः रक्तं केसरीसिंहस्य धमनीषु प्रवहति स्म ।

गुर्जरधरा यथा गौरवं प्राप्नुयात् तादृशानां केसरीसिंहस्य पूर्वजानाम् अस्याः वसुन्धरायाः प्रवहन्ति औदार्य-वीरता-निस्पृहता-साहाय्यभावना-प्रकृतिन्यायप्रियता –इत्यादीनां संस्कारनिर्झराणि इदं क्रान्तिकारिकुटुम्बम् अपिबत् । अस्य परम्परा वंशप्रतिवंशम् अवत्तीर्णा ।

केसरीसिंहस्य भ्राता जोरावरसिंहः क्रान्तिवीरः आसीत् । किशोरसिंहः इतिहासस्य ज्ञाता आसीत् । अखिलं कुटुम्बं स्वतन्त्रतायाः मन्त्रं नीत्वा मातृभूमये बलिदानम् अकरोत् ।

प्रताप ! त्वं क्रान्तिवीराणां नामानि वदिष्यति तर्हि कारागृहात् निर्गत्य प्रथमया भुशूण्डिगुलिकया तव वक्षस्थलं वेत्स्यामि ।

–केसरीसिंहः

(क्रान्तिवीराय पुत्राय कारागृहात् अकथयत् ।)

३

जीवनस्य आरोहावरोहौ

संस्कारसिञ्चनम्

आर्यसमाजसंस्थापकस्य स्वामिदयानन्दसरस्वत्याः शिष्येषु अन्यतमः आसीत् कृष्णसिंहः। एकं परतन्त्रतापादे कण्टकमिव तं पीडयति स्म अपरं तु तत्कालस्य हिन्दस्य राज्ञां महाराजानां च व्यवहार–दुराचार–चारित्र्यहीनविचारैः तस्य हृदयं नितरां दुःखमनुभवति स्म। एते सर्वे संस्काराः तस्य पुत्रस्य केसरीसिंहस्य रक्ते अवतीर्णाः आसन्। 'वीरविनोदः' इति ऐतिहासिकग्रन्थस्य रचयिता विद्वान् कविराजः श्यामलदासः केसरीसिंहस्य मातामहः आसीत्।

ख्रिष्टाब्द १८८२ तमे यदा दयानन्दसरस्वती उदेपुरे न्यवसत् तदा तत्रत्य महाराजेन सज्जनसिंहेन सह कृष्णसिंहः दयानन्दसकाशात् सप्तमासाः यावत् मनुस्मृति–न्याय–सांख्यशास्त्रादीनाम् अध्ययनं कृतवान्। कृष्णसिंहः अस्य महर्षेः शिष्यः अभवत्।

कृष्णसिंहः शाहपुरस्य महाराजस्य आंग्लजनैः सह मन्त्रणासमये उपस्थितो भवति स्म, किन्तु कदापि तेषां वचने ओमिति न उक्तवान्।

देवलीस्थः राजपुरुषः कर्नलजोवरः कृष्णसिंहाय तस्य जन्मभूमौ पञ्चवर्षाणि यावत् प्रवेशाय प्रतिबन्धम् अस्थापयत्। आंग्लाः ज्ञातवन्तः यत् कृष्णसिंहः स्वतन्त्रप्रकृत्याः जनो वर्तते।

कृष्णसिंहस्य जन्म ख्रिष्टाब्द १८४९ तमे फाल्गुनसुद-प्रथम-दिवसे स्वीय शासकीयग्रामे देवपुरायाम् अभवत्। तस्य मरणं ख्रिष्टाब्द १९०७ तमे जोधपुरे अभवत्।

केसरीसिंहस्य अयं वल्लभपिता कीदृशः सत्यनिष्ठः आसीत् तत् अधोलिखितघटनया ज्ञास्यते।

कृष्णसिंहः तत्कालस्य राजपूतानाम् इतिहासं लेखितुम् ऐच्छत्। सः जानाति स्म तस्मिन् समये सत्यवचनम् उच्चारयितुं वा लेखितुं महती समस्या स्यात्, कुत्रचित् अवमानं भवेत्, मित्रताभङ्गस्य प्रसङ्गः समागच्छेत् सम्बन्धविच्छेदोऽपिवा स्यात् इत्यादिकारणानि तस्य पुरतः आसन्, अत एव तस्य ग्रामाः यस्मिन् राज्यद्वये आसन् तस्य राज्यद्वयस्य राजानौ सः उक्तवान् यत्'अहं वर्तमानसमयस्य इतिहासं लेखितुमिच्छामि, किन्तु तत्र मत्समक्षम् एका समस्या वर्तते।'

'वदतु का समस्या?' इति राजानौ युगपदम् उक्तवन्तौ।

'अपरा समस्या नास्ति, किन्तु मम एकः समयः (शरत) वर्तते यत्– 'अस्मिन् इतिहासे अहं भवतोः गुणान् दोषान् च निरूपयिष्यामि, अतः तं ग्रन्थं द्रष्टुम् इच्छा न कर्तव्या तथा मन्मृत्योः अनन्तरम् अस्य ग्रन्थस्य नाशोऽपि न कर्तव्यः।'

उदेपुरस्य महाराजः सज्जनसिंहः तथा शाहपुरस्य राजा नाहरसिंहः, द्वावपि अस्य कृते अनुमतिं प्रदत्तवन्तौ। कृष्णसिंहः ख्रिष्टाब्दस्य १८८४ तमे अस्य कार्यस्य प्रारम्भं कृतवान्। अस्य ग्रन्थस्य प्रारम्भे लेखकस्य शुद्धतायाः, तटस्थतायाः, सत्यतायाः दर्शनं भवति।

कीदृशाः आसन् तस्य ते शब्दाः?

'अहं कृष्णसिंहः बारहठः, हृदयपूर्वकं नियमं स्वीकरोमि यत् ईर्ष्या–द्वेष–असूया–लोभ–क्रोध–भय–प्रीत्यादिकारणैः कदापि असत्यान् लेखान् न लेखिष्यामि।'

भारतीयः क्रान्तिवीरः श्यामजीकृष्णवर्मा तस्य मित्रम् आसीत्।

राजस्थानस्य बहुभिः राज्यैः कृष्णसिंहस्य सम्माननमपि अभवत् ।

एतद् अपि ज्ञातम् आसीत् यत् आत्मनः क्रान्तिवीरस्य पुत्रस्योपरि राजद्रोहस्य अभियोगः अभवत् । तस्य सम्पत्त्यादीनां ग्रहणमपि कृतम् । तस्य कुटुम्बं च निःसाहाय्यपरिस्थितौ संस्थाप्य तम् इतिहासं नष्टं कर्तुं महान् प्रयत्नः कृतः, किन्तु पुत्रवधुः अस्य इतिहासस्य रक्षणं कृतवती ।

इतिहासेऽस्मिन् ई.स. १८८७ तमे हिन्दुस्तानस्य तथा अफघानिस्तानस्य सीमाप्रदेशस्य विषये कीदृशी नीतिः देशीराज्यानि प्रति आसीत्? तस्य निरूपणं वर्तते । ई.स. १८८५ तमे अखिलभारतीयकोंग्रेस इत्यस्य स्थापनानन्तरम् आङ्ग्लजनाः हिन्दुजनान् उच्चपदोपरि न स्थापयन्ति स्म । विश्वासमपि न कुर्वन्ति स्म । ई.स. १८८६ तमे संवत्सरे मुंबय्यां कोंग्रेस इत्यस्य अधिवेशनम् अभवत् तदा लोर्ड–डफरीनस्य इङ्गितेन आङ्ग्ल–अधिकारिणः भारतीयेषु भेदभावम् आरब्धवन्तः । एतत् सर्वं अस्मिन् इतिहासे निर्भयतया आलेखितं वर्तते ।

एतादृशस्य वीरस्य पितुः अपत्यं केसरीसिंहः । 'वीरविनोदः' इति ऐतिहासिकग्रन्थस्य रचयिता कविः राजा श्यामलदासः तस्य मातामहः आसीत् । पितृपक्षस्य तथा मातृपक्षस्य संस्काराणां रक्तं तस्मिन् प्रवहति स्म । अनेन कारणेन तस्य बहिर्मुखी प्रतिभा विकसिता आसीत् । न केवलं तस्य काव्येषु अपि तु रक्तेऽपि देशभक्तिः प्रवहति स्म । तस्य नेत्रयोः भारतवर्षस्य ऋषेः दृष्टिः दीपायते स्म ।

शैशवं यौवनं च –

क्रान्तिवीरकवेः जन्म राजस्थानस्य शाहपुराराज्यस्य देवपुरायां दिनांकः २१–११–१८७२ तमे अभवत् । जन्मनः एकस्मिन् मासे तस्य माता दिवं गता । मातुः बख्तावरकुंवरदेव्याः अवसानानन्तरं बालकस्य केसरीसिंहस्य पालनं पितामही शृंगारकुंवरदेवी कृतवती । पितुः कृष्णसिंहस्य धमनीषु स्वतन्त्रतायाः रक्तं प्रवहति स्म, तस्य वंशजः कविः अयम् ।

कोटाराज्यस्य कविराजस्य देवीदानस्य भगिन्या माणिककुंवर्या सह

ई.स. १८९० तमे अस्य क्रान्तिवीरस्य कवेः पाणिग्रहणम् अभवत्।

शृंगारकुंवर कविराजस्य श्यामलदासस्य ज्येष्ठा भगिनी आसीत्। एवं द्वयोः पक्षतः कविः बुद्धिमत्तायाः पयःपानं कृतवान्। कविराजस्य श्यामलदासस्य शिक्षणेन तथा समाजसुधारणाविचारधारया अयं कविः प्रभावितः आसीत्। प्रारम्भे यदा कविः षड्वर्षीयः आसीत् तदा पिता कृष्णसिंहः शाहपुरायां तत्रत्यमहंतस्य सीतारामस्य मार्गदर्शने वर्षद्वयं शिक्षणप्रदानाय व्यवस्थाम् अकरोत्। तत्पश्चात् काशीतः पण्डितगोपीनाथशास्त्रीम् उदेपुरम् आहूय संस्कृतशिक्षणं दातुं प्रारब्धवान्। तस्मिन्नेव समये केसरीसिंहः 'अमरकोषं' कण्ठस्थीकृतवान्। चारणानां २३ शाखाभ्यः सः सौदाशाखायाः चारणः आसीत्।

कालेऽस्मिन् महर्षेः दयानन्दसरस्वत्याः बुद्धिप्रतिभायाः प्रकाशः समग्रं भारतं प्रकाशयति स्म। महर्षिः दयानन्दसरस्वती कविम् अनुरोधम् अकरोत् यत् सः कविराजस्य पाठशालायाः चारणच्छात्रान् भोजयितुम् इच्छति। अस्मिन् समये छात्रेषु केसरीसिंहः अपि आसित्।

कविः केसरीसिंहः अन्तिमेषु दिवसेषु कविराजस्य श्यामलदासस्य जीवनचरित्रं लिखितवान्। तत्र सः भारतवर्षस्य तं समाजसुधारकं महर्षिं दयानन्दसरस्वतीं विना विस्मृत्य उल्लिखति यत्, "महर्षेः गम्भीरवचसः इमे शब्दाः तस्य मस्तिष्के गुञ्जन्ति, कीदृशाः आसन् ते शब्दाः? – 'बालकाः। यूयं जन्मनः 'चारणाः' स्थ, किन्तु बह्वीं विद्यां संप्राप्य कर्मणः अपि 'चारणाः' भवत।" इमे शब्दाः अनन्तरं कविना सार्थकीकृताः। संस्कृत–गुजराती–बङ्गाली–मराठी इत्यादिभाषाः तेन स्वाधीनाः कृताः।

ई.स. १९९१ तमे एकोनविंशे वयसि सः महाराजस्य फतेसिंहस्य राजसभायां स्थानं प्राप्तवान्। राजपुरुषस्य कर्नलमाइल्सस्य मेवाडराज्ये मुहुर्मुहुः हस्तक्षेपात् ख्यातः धाराशास्त्री तथा क्रान्तिवीरः कृष्णवर्मा अनन्तरं भारतं त्यक्तवान्। गुजरातसर्वकारः वर्तमाने तस्य अस्थीनि युरोपतः भारतम् आनीतवान्। तस्मै मेवाडस्य अमात्यपदं दातुं फतेसिंहः निर्णयम् अकरोत्। इमं निर्णयं साकारीकर्तुं फतेसिंहः

केसरीसिंहाय कार्यं प्रदत्तवान् । अतः तम् अजमेरं प्रेषितवान् ।

महाराजस्य फतेसिंहस्य ज्येष्ठायाः राजकुमार्याः विवाहः कोटानरेशेण उमेदसिंहेन सह अभवत् । अनेन कारणेन उमेदसिंहस्य परिचयः कविना सह सञ्जातः । एवञ्च तस्य कौशलं दृष्ट्वा तं कोटां नीतवान् । केसरीसिंहस्य द्वौ भ्रातरौ आस्ताम् – मध्यमः किशोरसिंहः कनिष्ठः जोरावरसिंहश्च ।

कवेः पत्रव्यवहारेण फलितं भवति यत् ई.स. १९०२ तमे फरवरीमासे तथा मार्चमासे एकस्मै महत्त्वपूर्णाय कार्याय केसरीसिंहः कलकत्ताम् अगच्छत् । भारतधर्ममहामण्डलसभायाः संस्थापकः स्वामी ज्ञानानन्दः कवेः गुरुः आसीत् । सः तस्याः संस्थायाः अध्यक्षं दरभङ्गानरेशं रामेश्वरप्रसादं मिलित्वा केषाञ्चित् नीतिविषयकप्रश्नानां मार्गान्वेषणाय केसरीसिंहाय दायित्वं दत्तवान् । अयं स्वामी ज्ञानानन्दः स्वामिविवेकानन्दस्योपदेशात् संन्यासमार्गं स्वीकृतवान् आसीत् ।

काश्यां बाबुभगवानदासेन तथा कैश्चित् विद्वद्भिः सह केसरीसिंहस्य मेलनम् अभवत् । बाबुभगवानदासेन सहैव मिसिस–एनी–बेसन्ट-महोदयया मिलित्वा केसरीसिंहः लिखति – 'इयं विदुषी सज्जनतया बुद्ध्या पुरुषार्थेन च प्रशंसनीया वर्तते ।' काशीनागरीप्रचारिणीसभायाः मन्त्री बाबुश्यामसुन्दरः अपि केसरीसिंहेन मेलितुं समागतः आसीत् ।

दरभङ्गायाः महाराजस्य संदेशमवाप्य महाराजः सम्मानेन सह एकान्ते कविना अमिलत् । वारचतुष्टयं मेलनानन्तरं महाराजः धर्ममहापुरुषस्य नीतीनां प्रसिद्धिम् अकरोत् । 'भारतमित्रम्' इति कलकत्तायाः सम्पादकः तस्य उल्लेखं कृतवान् ।

कोटाराज्यस्य 'एकनोग्राफी सर्वे' इत्यर्थम् अध्यक्षत्वेन केसरीसिंहः नियुक्तः । कोटाराज्यस्य पुस्तकालयस्य पाण्डुलिपिं व्यवस्थितं कर्तुं कार्यं तस्मै दत्तवान् आसीत् ।

चारणेषु सः अग्रणी आसीत् । चारणीसाहित्यस्य संशोधकः विद्वान् खेतसिंहजीमीसणेन (मोढेरा–उत्तरगुजरातम्) सत्यमेव निरूपितं यत्,

'केसरीसिंहः नाम्नः केसरीनरस्य हुंकारमात्रेण राजपूताः तथा मध्यभारतस्य नैके आंग्लाधिकारिणः व्यग्राः भवन्ति स्म । आंग्लसत्तायाः समक्षं भयभीतान् क्षत्रियान् दृष्ट्वा तस्य हृदयम् उद्विग्नम् अभवत् ।'

सेवाधर्मस्य बलिवेद्यां सः सर्वस्य आहुतिं दत्तवान् । तस्य पत्नी मुखाच्छादनप्रथां परित्यज्य पतिम् अनुसृतवती । चतुर्दशवर्षाणि यावत् सा विपत्तिग्रस्ता आसीत् ।

मातृभूमिसेवायै स्वकुटुम्बस्य त्यागकर्तारः बहूनि न्यूनानि पात्राणि सन्ति । भ्राता–पुत्र–जामाताऽऽदयः सर्वे यथा यज्ञवेद्याम् हुताः अभवन् । स्वतन्त्रतासमरे ते क्रान्तिवीराः अभवन् । किन्तु स्वतन्त्रताप्रकाशं न दृष्टवन्तः ते । सः आज्ञाकारिणीं जाजल्यवतीं च पत्नीं मणिकुवरीं प्राप्तवान् । पितरम् अनुसरन् पुत्रः प्रतापसिंहोऽपि क्रान्तिवीरः सञ्जातः । पत्नीं प्रति कीदृशः अनन्यभावः आसीत् तत्तु कविशब्दैः एव ज्ञायते ।

'वीरां प्रतापजननीं सततं स्मरामि' इति । सः उदेपुरे शिक्षणं प्राप्नोत् । संस्कृतभाषायाः सः उत्कृष्टः विद्वान् आसीत् । तस्य लेखनी प्रभावशालिनी आसीत् ।

केसरीसिंहस्य सिंहहुँकारमात्रेण राजपूताः (क्षत्रियाः) तथा मध्यभारतस्य वरिष्ठाः आंग्लाधिकारिणः व्यग्राः भवन्ति स्म ।

- चारणीसाहित्यविद्वान् एवं केसरीसिंह-
दृष्टा खेतसिंहजी मीसण - मोढेरा

3.

४

क्रान्तिवीरस्य मार्गे

कविः यदा उदेपुरे शिक्षणस्य प्रारम्भं कृतवान् तदा तस्य समक्षं पराधीनभारतस्य मर्दयन्तः मानवाः दृष्टिपथमवतरन्ति स्म। परतन्त्रता तं पीडयति स्म। भारतीयसमाजः यथा भग्नः इति सः अनुभूतवान्। वीरत्वं ग्लानं सञ्जातम्। क्षत्रियत्वं पङ्गुत्वम् प्राप्नोत्। प्राचीनभारतगौरवपरम्परापुनरुत्थाय प्रतिज्ञाबद्धः सः जीवनयौवनं सज्जीकृतवान्। भारतीयेतिहासं गहनतया परिशील्य सः तस्मात् प्रेरणां प्राप्तवान्। क्व राजस्थानस्य राजपूर्वजानां वीरत्वं? क्व तत्कालिनराज्ञाम् आङ्ग्लानां पुरतः नतमस्तकव्यवहारः? कविः एतत्सर्वं दृष्ट्वा महत् दुःखमनुभवति स्म।

विंशतितमस्य शतकस्य प्रथमे दशके सः तरुणानां सशस्त्रक्रान्तियोजनां व्यरचयत्। अनेन देशान्तरे वसन्तः भारतीयनेतारः देशस्वतन्त्रतायै प्रेरिताः। तस्मिन् समये उत्तरभारते रासबिहारीबोझ–शचीन्द्रसान्याल– लालाहरदयालेत्यादीनां नेतृत्वे अभिनवभारतस्य एकं सङ्घटनं भवत् आसीत्। पूर्वभारतेऽपि जतीनबाघामहोदयस्य नेतृत्वे क्रान्तिकारि-प्रवृत्तयः प्रारब्धाः। मिरझापुरस्य पण्डितः विष्णुदत्त त्रिवेदी, लाहोरस्य बालमुकुन्दः, कानपुरस्य सोमनाथः इत्यादिक्रान्तिवीरैः सह केसरीसिंहस्य संपर्कः जातः तथा ते सर्वे सम्मिलिताः।

केसरीसिंहेन सह राजगोपालसिंहः खरवा तथा जयपुरस्य अर्जुनलालाशेठी 'अभिनवभारत' इति सङ्घटनस्य मुख्यौ सूत्रधारौ अभवताम्।

ई.स. १९१० तमे सः 'वीरभारतसभायाः' स्थापनां चकार। तस्यां सभायां केचन राजानः भूस्वामिनः इत्यादयः केसरीसिंहस्य प्रभावेन सदस्याः अभवन्। एषा संस्था क्षत्रियसुधारणया सह सावधानेन संयोजिता।

देशभक्त्याः वर्णः सः स्वगृहादेव आरब्धवान्। तस्य सूनुः प्रतापसिंहः, जामाता ईश्वरदानः, कनिष्ठः भ्राता जोरावरसिंहश्च क्रान्तिवीरेषु संलग्नाः।

स्वपुत्रीं चन्द्रमणीं लिखिते पत्रे तस्य देशभक्त्याः दर्शनं भवति। पश्यामः तस्य शब्दान् – 'भारते जन्मना सहैव कर्तव्यं मानवजीवनेन सह अविभाज्यरीत्या भवत्येव। तत्कर्तव्यपालने एव अस्माकं कल्याणं निहितं वर्तते' इति।

'भारतस्य एकस्मिन् महत्त्वपूर्णे प्रदेशे जागरणस्य प्रारम्भः अस्माकं कुटुम्बस्य आहुत्या अभवत्'।

रासबिहारीबोसः लिखति यत् 'स्वतन्त्रतायाः समरे पिता पुत्रं प्रेषितवान् इत्यस्योदाहरणं तु लभते किन्तु स्वस्य जामातरं प्रेषितवान् इत्यस्योदाहरणं केसरीसिंहं विहाय भारतवर्षे कुत्रापि न लभ्यते'।

क्षत्रियच्छात्राणां कृते कोटायां तथा जोधपुरे छात्रावासान् संस्थाप्य वैदेशिकानां विरुद्धं क्रान्तिकारिविचारान् अतनोत्। 'क्षात्रशिक्षापरिषद्' इति योजनां विरच्य क्षत्रियाणां नाम्नः देशभक्तिविचारेण सह निवेदनं सः प्रकाशितवान्।

नृपाः यथा जागृताः भवेयुः तथा स्वरचितेषु दुहाकाव्येषु सः उवाच यत्–

अवधि अब ओछीह, सोची जै सह भूपत्यां।
पडगी पख पोचीह), नीत स लोची नह रखी ।।

(सर्वे भूपतयः चिन्तयन्तु यत्, 'इदानीं समयः न्यूनः वर्तते।) मार्मिकभाषया कविः कथयति यत्–

साज्यां बणीकां साज, रजवट वट खोंवै रिधु।
रहसीन ओ राज, आज लगां जिण विद रह्यौ ।।

(राज्यप्रभावसंयुतं शृङ्गारयुक्तं यद्राज्यम् अद्यावधिः यथा आसीत् तथा न भविष्यति।)

आंग्लशासनोपरि गौरवमनुभवतः राज्ञः स्वतन्त्रतायाः पूर्वपञ्चदशकेषु कविः सावधानं कृतवान्। एतावत् न अपि तु भविष्यस्य वास्तविकता कीदृशी वर्तते, तदर्थं पश्यतु एतत् दुहाकाव्यम्–

ऊपर रे आधार, पग समेट झूले पड्या।
कीं जाणे करतार, खसक पडै खतिया कडा।।

(उपरि आधारेण इदानीं पादेन सह भवन्तः दोलायन्तः सन्ति, परन्तु आधारेण सह संलग्नं भित्तिकङ्कणं (भित्तिनिगडः) कदा स्खलिष्यति तत्तु करतारः अपि कथं जानीयात्?)

स्वतन्त्रतासङ्ग्रामे राजस्थानस्य निष्क्रियताविषये कविः कथयति यत्–

बाजी ली बङ्गाल, महाराष्ट्र बढिया मरद।
पग धकिया पंचाल, दुबक रह्या देसोतडा।।

(बङ्गेन उत्तरदायित्वं कृतं, महाराष्ट्रं तु पराक्रमी वर्तते। पञ्चाले पादं प्रसारितमस्ति, राजस्थानं तु पृष्ठे वर्तते।)

धर गुर्जर की धाक, डगमग बड आसण डिगै।
हा राजपूत आवाक, ताक रहया भवितय में।।

(गुजरातस्य प्रभावेन आंग्लानां बृहत् शासनं प्रकम्पते, अहाहा! क्षत्रियाः मूकाः भूत्वा यद्भवितव्यं तद्भवतु इति पश्यन्तः सन्ति।)

क्षत्रियेषु निहिता शक्तिः राष्ट्रकार्याय स्यात् तदर्थं कविः महतः प्रयत्नान् अकरोत्। तथापि तस्य प्रभावः न ज़ातः। अत एव कविना खेदवचसा उपरोक्तं दुहाकाव्यं श्रावितम्।

स्वतन्त्रतायै समर्थयुवकनिर्माणाय एका संस्था तस्य सहायकेन अर्जुनलालेन जयपुरे संस्थापिता। तस्यां संस्थायां प्रशिक्षणं प्राप्तुं सः तस्य पुत्रं

जामातरं च प्रेषितवान्। अस्याः संस्थायाः केचन छात्राः स्वतन्त्रतासङ्ग्रामस्य कृते आवश्यकधनार्थं लुण्ठकानामिव आक्रमणं कुर्वन्ति स्म। तस्य भ्राता–जोरावरसिंह-इत्यादयः स्वतन्त्रतासङ्ग्रामाय धनेच्छया निमेजग्रामस्य मन्दिरे आक्रमणं कृतवन्तः। स्वराज्यं प्राप्तुं क्रान्तिकारिसाहित्यस्य अयं कविः पक्षधरः आसीत्।

अष्टाविंशतिदिवसानाम् अनशनेभ्यः अनन्तरं कारागृहस्याधिकारिणः तस्य पत्न्याः हस्ते स्वल्पं दुग्धं दातुं प्रारब्धवन्तः।

बिहारस्य तथा ओरिस्सायाः कारागृहस्याधिकारि एकस्मिन् दिवसे कृष्णसिंहं प्रोवाच यत् – 'राणाप्रतापस्येतिहासात् वयं मेवाडस्य प्रशंसां श्रुतवन्तः, किन्तु अत्र वयं ज्ञातवन्तः भवान् विजयं प्राप्तवान् अस्ति, इदानीं भवते दुग्धं प्रदास्यते'।

महाभारते युधिष्ठिरः गुरुद्रोणं प्रश्नं पृच्छति – 'गुरुवर्य ! भवानपि न्यायस्य धर्मस्य पक्षं विचार्य अस्माकं पक्षे न भविष्यति वा?' तदा गुरु द्रोणः यदुत्तरं दत्तवान् तत् श्रोतव्यम्, – 'धर्मराज ! त्वं जानासि यत् प्रत्येकं जनः धनदासो वर्तते। वयं कौरवानां राज्ये निवसामः, तस्य अन्नादिकं भुञ्जामः, अतः वयं तान् परित्यक्तुं न समर्थाः'। गुरुद्रोणसदृशः महान् ऋषिवरः एतादृशम् उत्तरं प्रायच्छत्, तस्य समक्षं केसरीसिंहं स्थापयामः। शाहपुरादीनां प्रभुत्वं तस्य राज्ञः केसरीसिंहस्य पिता प्राप्तवान् आसीत्। अयं क्रान्तिवीरोऽपि तस्य राज्यस्य राजकविः आसीत्। तस्य राज्यस्यैवान्नं खादति स्म। यदि सः गुरुद्रोणवचनस्यानुसरणमकरिष्यत् तर्हि तेनापि राज्ययोग्यमेव करणीयम् अभविष्यत्। किन्तु अयं तु सिंहः आसीत्। सः राज्यस्य निर्बलायाः तथा आंग्लानां कुटिलनीत्याः समक्षं पर्वतगुञ्जनं कुर्वतीः गर्जनाः अकरोत्। समग्रस्य कुटुम्बस्य जनस्य एकस्मिन् हस्ते स्वतन्त्रतायाः प्रज्वालितः अग्निदण्डः प्रदत्तः एवञ्च मुखे मातृभूमये त्यागमन्त्रः स्थापितः आसीत् तेन। आत्मनः तथा स्वकुटुम्बस्य किं भविष्यति? इति चिन्तनमनेन नरसिंहेन नैव कृतम्। कम्

अग्रपङ्क्तौ प्रस्थापयामः? गुरुद्रोणं वा इमं क्रान्तिवीरम्? भीष्मपितामहस्य उपस्थितौ भारतकन्यायाः द्रौपद्याः वस्त्रहरणं भीष्मपितामहः अपश्यत्। सः तत्क्षणं मनसः दुःखं व्यक्तीकृतवान्, किन्तु अनेन क्रान्तिवीरेण तथा तत्पुत्रेण वीरप्रतापेन जन्मभूमेः त्रपावारणाय सर्वेषां पुरतः त्यागमार्गः चितः। तौ भूप्रभुत्वस्यापि चिन्तां न कृतवन्तौ। हिन्दमातुः श्वेतानां पादैः मर्दयन्तं वक्षस्थलं तथा ब्रिटनदेशं प्रति आकृष्यमाणं धनं दृष्ट्वा तौ विदीर्णहृदयौ सञ्जातौ। अयं क्रान्तिवीरः कया रीत्या सम्मानितः तत् अधोलिखितदुहागीतेन फलितं भवति।

करसण कीधौ केहरी, खडयौ बगावत खेत।
राजकडुंबौ साझीयौ, नह बडियौ निजहेत।।
सुहड भ्रात जामात सुत, समिधा हुआ सुचंग।
जग्य हुतासण झोंकिया, रंग केहर घणरंग।।
कुरब कायदा चल अचल, जर जेवर जागीर।
दीया देशहित दावमें, धन्य केहर रणधीर।।

अपरः एकः कविः अधोलिखितदुहागीतेन केसरीसिंहं लोकहृदये उपावेशयति।

साहां नै सुभराज, दीधा केइक दुथियां।
गोरां उपर गाज, करग्यौ एक ज केहरी।।

कविः सर्वस्य सहनं कृतवान् किन्तु परतन्त्रतायाः सहनं न कृतवान्। तत् अधोलिखितदुहागीते वर्णितमस्ति।

दिन दुणा निश चौगुणा, सह्या कष्ठ अनेक।
सही न गई पल सिंहथी, पराधीनता एक।।

प्राचीनः पत्रकारः श्रीयज्ञदत्तशर्मा केसरीसिंहस्य ई.स. १९४० तमे जोधपुरे चारणच्छात्रालये साक्षात्कारम् अकरोत्। तदा बारहठजी प्रॉ. इन्द्रविद्यावाचस्पतिद्वारा 'जनसत्ता' इति दैनिकवृत्तपत्रे यद्विवरणमागतं तस्मिन् संदर्भे दर्शितं यत् – 'हिन्दस्य सूर्यः (मेवाडपतिः) यदा देहलीं गन्तुं प्रस्थितः

तदा वीरता रुदिता आसीत् ।' अहं सहनं कर्तुं न शक्तवान्, अहं खड्गस्य स्थाने लेखनीं गृहीतवान् तदा तस्याः "ચેતવણી રા ચૂંગટયા" इति न्यसरत् ।

स्वातन्त्र्यसङ्ग्रामे पिता पुत्रं प्रेषितवान् इत्यस्योदाहरणं लभते किन्तु स्वस्य जामातरं प्रेषितवान् इत्यस्योदाहरणं केसरीसिंहं विहाय भारतवर्षे कुत्रापि नोपलभ्यते ।

- (क्रान्तिवीरः रासबिहारी बोसः)

५

राजद्रोहस्य अभियोगः एवं कारागृहम्

‘इदानीं महाराजः भवन्तं स्मरति।’

‘एवं त्वरितं किमर्थम् आहूतः? अधुना तु मम स्वस्य कार्याण्यपि अवशिष्टानि सन्ति’।

‘तात! वयं तु पत्रसेवकाः स्मः किन्तु भवान् तु राजसदसि उपविशति, तर्हि मत्सदृशेन जनेन किं वक्तव्यम्?’

राजस्थानस्य शाहपुराराज्ये स्थितं केसरीसिंहस्य प्रासादमागत्य शाहपुराराज्यस्य राज्ञः नाहरसिंहस्य सन्देशं श्रावयन् एकः राजपुरुषः स्थितः आसीत्। कवेः केसरीसिंहस्य दृष्टिः तस्य नयने पठितुं यत्नं करोति, किन्तु किमपि सः न अवगच्छति। प्रथमविश्वयुद्धस्य रणभेरी विश्वस्य चतुष्पथि श्रूयते स्म। तस्मिन् समये कविः आकाशं प्रति एकां दृष्टिं निपात्य द्वितीयां दृष्टिं यथा भारतभूमेः उपरि अटताम् आंग्लानाम् उपरि पातयति स्म। देशस्वतन्त्रतायै ईहा तं सुखेन उपवेष्टुं न प्रभवति स्म। धृतवस्त्रतनुना सः गृहात् बहिः निर्गतः। राजदूतः तस्य संपुष्टं शरीरं पश्यन्नेव अभवत्।

शाहपुरायाः स्वपैतृकप्रासादस्य सोपानानि शीघ्रतया आरोहितवान्। क्षणान्तरं महाराजेन सह चर्चां कृत्वा कविः प्रत्यागत्य प्रासादसोपानानि च अवतीर्य यदा बहिरागच्छत् तदा महाराजः नाहरसिंहः पृष्ठतः तस्य समक्षमवलोकितवान्। केसरीसिंहः यदा द्वारात् बहिरागच्छति तत्क्षणमेव तत्रैव

इन्दोरस्य महारक्षकपाल: श्रीमन् आर्मस्ट्रोंग: तस्मै हस्तनिगडं धारयति। कवि: राज्ञ: नाहरसिंहस्य कपटं ज्ञातवान्। २१–३–१९१४ तम: दिवस: कवे: कृते हस्तनिगडं स्वीकृत्य आगत: इति भाति। आर्मस्ट्रोंग स्मितपूर्वकं हसन् आसीत्। एवं छद्मजालं प्रसार्य कपटं च कृत्वा उदिता: भारतीया: नाशनीया: इति मन्त्र: आसीत् आंग्लानाम्। केसरीसिंहस्य नयने रक्ते सञ्जाते।

क्षत्रियाणां नवजागरणाय तथा सङ्घटनाय या: प्रवृत्तय: कृता:, तासु प्रवृत्तिषु केसरीसिंहस्य हस्त: आसीत् तथा केसरीसिंह: राजद्रोहं कृतवान् इत्यस्य वार्ताम् आंग्ला: प्राप्तवन्त:। इत्यस्माद्धेतो: ई.स. १९१२ तमे एतादृशानां राजद्रोहकर्तॄणाम् उपरि अवलोकनं कर्तुं सी.आई.डी. संस्थायै कार्यं प्रदतम्।

देशस्वातन्त्र्यर्थं करतले मृत्युं स्वीकृत्य अटद्भि :रासबिहारीबोस – मास्टरअमीचन्द – लालाहरदयाल – श्यामजीकृष्णवर्मा – अर्जुनलालसेठी – रावगोपालसिंह-खरवादिक्रान्तिवीरै: सह क्रान्तिवीरस्य केसरीसिंहस्य घनिष्ठ: सम्बन्ध: आसीत्। भारतदेश: आङ्ग्लपरतन्त्रतात: मुक्त: स्याद् इति मन्त्र: आसीत् एतेषां सर्वेषाम्। तदर्थं मृत्युभयमपि नासीत् तेषु।

येषां क्रान्तिवीराणां गतिविध्यवलोकनं क्रियते स्म तेषु केसरीसिंहस्य नाम मुख्यमासीत्।

दिल्ली-लाहोरछलाभियोगान्वेषणे, इन्दोरे अर्जुनलालसेठच-भियोगान्वेषणे, जोधपुरप्यारेराममहन्तस्य हनने च केसरीसिंहस्य तथा तस्य सहायकानां नामानि बहिरागतानि तत् दृष्ट्वा आंग्ला: विस्मिता: सञ्जाता:। तेषां संशय: उपलब्धै: प्रमाणै: दृढ: जात:, अत: केसरीसिंहस्योपरि राजद्रोहस्य अभियोगचालनाय तथा हत्यानियमान् प्रयुज्य अस्याभियोगस्य सूक्ष्मान्वेषणाय श्रीमते आर्मस्ट्रोंगमहोदयाय कार्यं दत्तम्। तस्य साहाय्यार्थं गुप्तापराधान्वेषणसंस्थाया: अधिकारिण: अपि योजिता:। अनेन कारणेन एव आर्मस्ट्रोंग: शाहपुराम् आगच्छत्। स: योजनापूर्वकं महाराजस्य साहाय्यं प्राप्य कपटं च कृत्वा कविं केसरीसिंहं हस्तनिगडं धारयितवान्। (दिनांक : २१–३–१९१४)। आर्मस्ट्रोंग: एतान् क्रान्तिवीरान् स्वीकृत्य अश्वशकटद्वारा

इन्दोरं प्रति प्रस्थितवान्।

इन्दोरस्य समीपे 'मऊंकेन्टोमेन्ट' इति कारागृहे केसरीसिंहं संप्रेष्य, तस्मै यातनाः प्रदत्ताः। मासत्रयं यावत् अस्य क्रान्तिवीरस्योपरि यातनां प्रदातुम् आंग्लाः पृष्ठें न दृष्टवन्तः। अस्मिन् कारागृहे तस्योपरि एतावत् कष्टं प्रदीयते स्म यत् सः संपूर्णरात्रौ शयनमपि कर्तुं न शक्नोति स्म। केसरीसिंहस्याभियोगः सर्वाधिकः बृहदभियोगः आसीत्।

केसरीसिंहाय शूलबन्धं क्षेप्तुम् आङ्ग्लाधिकारिणः योजनापूर्वकम् अग्रेसराः भवन्ति स्म। केसरीसिंहाय झटिति शूलबन्धो भवेत् तदर्थं कोटायां विशेषन्यायालयः निवेशितः। एवञ्च विशेषन्यायाधीशरूपेण पण्डितश्रीरामभार्गवस्य चयनं कृतम्।

जोधपुरस्य सोमदत्तलहरी रामकर्णः च तथा कोटायाः हीरालालजालोरी अपि उपस्थिताः आसन्। लक्ष्मीलालभटनागरः मुख्यः साक्षी अभवत्। राजकर्णोऽपि मुख्यः साक्षी सञ्जातः किन्तु न्यायाधीशस्य समक्षं तौ परिवर्तितौ।

अभियोगस्य महत्त्वं कियद् आसीत् तस्य ज्ञानं एतस्मात् भवति यत् ब्रिटिशसर्वकारस्य गुप्तचरसंस्थायाः नियामकस्य सर–आर्चीबल्डि–कलींवलेण्डमहोदयस्य प्रत्यक्षावलोकने अस्याभियोगस्य सञ्चालनं प्रदत्तम्। दिल्लीलाहोरकपटाभियोगे यः अधिवक्ता आसीत्, तस्मै रायसाहेबमूलचन्दाय एतत्कार्यं प्रदातुं आंग्लाः कोटाराज्यं निर्दिष्टवन्तः।

आङ्ग्लसर्वकारः जोधपुरस्य प्यारेलालसाधुहत्यामपि राजकीयहत्यायां सन्निवेशयितुमिच्छति स्म, किन्तु कविं प्रति महाराजस्य उमेदसिंहस्य स्नेहात् तथा दीवानरघुनाथदासचौबेमहोदयस्य साहसात् एतस्याः राजकीयहत्यायाः निर्मूलत्वं जातम्।

आर्मस्ट्रोंगस्य व्यवहारविषयकगुप्तलेखने उट्टङ्कितं वर्तते यत् – 'राजपूतराज्येषु आङ्ग्लशासनविरुद्धे विद्रोहकर्तारः मुख्यभूताः त्रयः जनाः आसन्–केसरीसिंहः, बनारसस्य अर्जुनलालसेठी, विष्णुदत्तश्च।

आङ्ग्लसैन्यस्य राजपूतानादले प्रविश्य तत्रत्य सैनिकाः आंग्लविरोधिनः कर्तव्याः इति योजनाऽऽसीत्। अधिवक्ता नवाब-हामिदअलीखानः स्वस्याधिवक्तृलेखं न्यायालये प्रदर्श्य अस्य क्रान्तिवीरस्य कवेः रक्षणमकरोत्।

लखनऊद्वारा प्रकाशितं Eminent Indians (इमीनन्ट इन्डियन्स) इत्यत्र निर्दिष्टानुसारं नवाबहामिद–अलीखानः षड्वर्षाणि लण्डननगरे अभ्यासमकरोत्। अतः तत्कालीनेन प्रधानमन्त्रिणा ग्लेण्डस्टनेन, विदेशसचिवेन लोर्डसैल्सबरिणा, लोर्डनोर्थबुकेन, लोर्डडफरीनेन इत्यादिभिः सह तस्य व्यक्तिगतः परिचयः आसीत्।

जवेरचन्दमेघाणीमहोदयस्याभियोगे धोलकान्यायालये स्ववेदनां प्रकटीकुर्वन् सः जनपूर्णे न्यायालये अगायत् यत्–

हजारो वर्षनी जूनी अमारी वेदनाओ हती।
कलेजा चीरती कंपती अम भय कथाओ हती।।

(अर्थात् अस्माकं वेदनाः सहस्त्रं वर्षपुरातन्यः आसन्, ताः हृदयविदारिताः अस्माकं भयकथाः आसन्) तदा जनसंमर्दः तत् दृश्यं दर्शनीयमासीत्। कवेः दुःखस्वरेण तत्र स्तब्धता छादिता। तथैव यदा अधिवक्ता हामिद–अलीखानः केसरीसिंहस्य संरक्षणपक्षं स्थापितवान् तदनन्तरं केसरीसिंहस्य मनोवेदनां अधिवक्ता स्वकाव्यरचनया अभिव्यक्तम् अकरोत्। ई.स. १९०८ तमे अलीपुरविस्फोटकाभियोगः अभवत्। तत्र अरविन्दघोषसम्बन्धे अधिवक्ता चित्तरञ्जनदासोऽपि एतादृशं भावम् अभिव्यक्तं कृतवान्।

कविराष्ट्रभावनापूर्णा देशगौरवप्रस्थापिता अधिवक्तृद्वारा जनपूरितन्यायालये २–९–१९१४ तमे दिनांके प्रस्तुतकाव्यरचनाऽऽसीत्–

यह इरशादे अदालत है उठो तुम बहस को 'हामिद'
निगाहें मुल्जिमों की भी मगर कुछ तुमसे कहती हैं।
अदब से यह गुजारिश है हुजुर अब गौर से दम भर,
इधर देखें कि लफ्जे खून होकर दिल से बहती हैं।
लहू का एक दरिया जो न देखा जाएगा हर्गिज,

बहेगा इस जमीं पर खूबियाँ जिस जा पे रहती हैं।
इसी इजलास में याने कहेंगे किस्सा मुल्जिम का,
वो मुल्जिम उम्र जिसकी देश की खिदमत में गुजरी हैं,
वो मुल्जिम शायरे–यकतां सबायें जिसको कहती हैं।
वो मुल्जिम पानी होकर हड्डियाँ अब जिसकी बहती हैं।
वही मुल्जिम बराबर केद के जिसका हिरासत हैं,
बदन में हड्डियाँ जितनी हैं, सब तकलीफें सहती हैं।
वो मुल्जिम केसरी जो जां–ओ दिल से देश का ह्यमी,
वो जिसकी खुबियाँ अखलाक का दम भरती रहती हैं।
बहुत शौहरत सुनी है, आपके इन्साफ की हमने,
अदालते गुस्तरी की नदियाँ हर सिम्त बहती हैं।
महाराजा के शाये में यही नायब रहे 'हामिद'
रियासत की भलाई हो दुआयें हक से कहती हैं।

कोटायाः विशेषन्यायाधीशः केसरीसिंहं सोमदत्तं रामकरणं च विंशतिवर्षाणाम् आजीवनकारावासेन दण्डितवान्। हीरालालं वर्षत्रयस्य दण्डं दत्तवान्।

अस्य दण्डस्य विषये कोटाराज्यस्य महाराजाय निवेदितं किन्तु सोऽपि ११–१२–१९१४ तमे दिनांके तमेव निर्णयमङ्गीकृतवान्। महाराजः बलेन वशीभूतः आसीत्।

तस्मिन् दिवसे केसरीसिंहस्योपरि आपत्तिवर्षा प्रकर्षेण वर्षति स्म। आंग्लान् मोदयितुं यस्य राज्यस्य केसरीसिंहः राजकविरासीत् तस्य राजा नाहरसिंहः कवेः परम्पराप्राप्तपितृसंपदं ग्रामं, हर्म्यं सर्वं प्रतिस्वीकृतवान्। कवेः कुटुम्बं मार्गोपरि आगतम्।

राजद्रोहस्यास्याभियोगस्य प्रतिदिनं वार्ता एँग्लोइन्डियनमध्ये, टाईम्स–ऑफ–इण्डियामध्ये, पायोनियर–स्टाफ–रिपोर्टमध्ये मुद्रिता। कोटानगरं तस्मिन् समये आरक्षकगृहमिव अभवत्। कोटानगरस्य

शालामहाशालासु अस्याभियोगस्य वार्ताः रसपूर्वकं पठ्यन्ते स्म। एतानि वृत्तपत्राणि केसरीसिंहविरुद्धं विषं प्रकटयन्ति स्म। एकस्मिन् सप्ताहे एव 'अभ्युदये' लिखितं यत् – "केसरीसिंहस्य बालकानां शिक्षणस्य किं भविष्यति?"

फतेसिंहमानवस्य "केसरीसिंहबारहठे" इति हिन्दीपुस्तके कवेः हस्ताक्षरैः तस्य पुत्र्यै चन्द्रमणये लिखितं पत्रमत्र प्रस्तुतं वर्तते। तत्र केसरीसिंहस्य विचारधारायाः सम्यक् दर्शनं भवति। प्रत्येकं भारतीयस्यान्तःकरणं स्पर्शति पत्रेऽस्मिन् कविः मानवकर्तव्यं प्रति अङ्गुलिनिर्देशं कृतवान् अस्ति। न एतावदपि भारतस्वतन्त्रतायै तस्य कुटुम्बेन यत्पदं स्थापितमस्ति तत्र प्रत्येकं भारतवासी गौरवमनुभवितुं शक्नोति तादृशं तेजः विकसितम्।

केसरीसिंहस्य अस्याभियोगस्य चर्चा समग्रे देशे जाता। केसरीसिंहस्य व्यक्तित्वस्य बलिदानस्य, स्वतन्त्रताभक्तेः च गंभीरः प्रभावः सञ्जातः। तदा ई.स. १९१६ तमे लोकमान्यतिलकः क्राँग्रेस–अधिवेशनं प्रति गच्छन् आसीत्। पूनातः रेलयानं प्रस्थितं तत्कोटां प्रति प्राप्तमेवासीत् तदा एकः स्वतन्त्रतासेवकः तिलकम् उक्तवान्, 'कोटां प्राप्तवन्तः' इति। लोकमान्यस्य कर्णयोः यदा इमे शब्दाः आपतिताः तत्क्षणमेव तस्य मानसप्रदेशात् शब्दाः निस्सृताः यत् – 'किं कोटा?', 'केसरीसिंहस्य बारहठस्य कोटा वा?' एतेन वाक्यद्वयेन ज्ञानं भवति यत् तस्मिन् समये केसरीसिंहस्य प्रभावः कीदृशः आसीत्? 'लोकमान्यतिलकः कोटायाः रेलस्थानके एव कम्बलं प्रसार्य तत्रैव भोजनमकरोत्' इति उक्तवन्तौ तत् दृश्यं दृष्टवन्तौ स्वयंसेवकौ।

केसरीसिंहाय विंशतिवर्षाणां देशनिष्कासनस्य दण्डः अभवत्। किन्तु नियमानुसारं चत्वारिंशत् वर्षोत्तीर्णानां कृते आन्दोमानकारागृहशिक्षा भवितुं नार्हति अतः कोटायाः सेन्ट्रलकारागृहे एव सः प्रेषितः।

कोटातः हजारीबागपर्यन्तं केसरीसिंहं नेतुं कोटायाः मुख्यरेलस्थानकात् व्यवस्थां न कृत्वा कोटानगरतः नीतवन्तः। स्वपुत्र्या सौभाग्यवत्या सह कस्मिंश्चित् वार्तालापप्रसङ्गे अस्योल्लेखः कृतो वर्तते। तत्

सौभाग्यवती स्वदैनन्दिनलेखने उल्लेखितवती । तस्याः दैनन्दिनलेखनमत्र यथा–

"माम् एकस्मिन् बलिवर्दशकटे शयनं कारितवन्तः । मम हस्तयोः पादयोः च निगडं स्थापितवन्तः । मम शरीरस्य बलिवर्दशकटेन सह पाशेन कठोरतया बन्धनं कृतवन्तः । अहम् अपसरितुमपि असमर्थः आसम् । रात्र्याः समयः आसीत् । कोटाराज्यस्य तथा ब्रिटिशसर्वकारस्य आरक्षकाः भुशूण्डया सह मया सह चलन्ति स्म । अहं न जानामि स्म, मम शकटेन सह बन्धनं कृत्वा माम् कुत्र नयन्ति इति। तस्मिन् शकटे शयनं कुर्वन् मम दृष्टिः आकाशस्य नक्षत्राणाम् उपरि गता । अहं पश्यन् आसम्, यत् कतमत् नक्षत्रं कस्यां दिशि वर्तते?"

क्रान्तिवीरे केसरीसिंहे कियद् आत्मबलं स्यात् ! तस्य ज्ञानं अनया घटनया भवति । तस्य कुटुम्बस्य च विचारान् परित्यज्य क्रान्तिवीरोऽयं स्थितप्रज्ञ इव आकाशनक्षत्रगतिविधौ मग्नो भूत्वा स्वगतिविधिं परित्यजति । मातृभूमये कस्यापि विपदः पुरतः नतमस्तकाः अभूत्वा एतादृशाः वीराः तेषां प्रदानेन आंग्लानां कृते विपत्तिरूपाः अभवन् ।

हजारीबागकारागृहे प्रायः बङ्गजनाः आसन् । सः तत्र असाक्षरेभ्यः बन्दीजनेभ्यः सस्यबीजैः हिन्दीभाषायाः अक्षरज्ञानं दत्तवान् । एवञ्च भारतस्य मानचित्रं विरच्य भौगोलिकपरिस्थितेः ज्ञानमपि प्रदत्तं तेन ।

बङ्गसाहित्यस्य श्रेष्ठपुस्तकाय हजारीबागकारागृहात् क्रान्तिवीराय प्रफुल्लाय बङ्गभाषापेतं काव्यं प्रेषितं, तत्काव्यं इत्थं वर्तते –

मरि मरि की सुन्दर, बङ्ग बाणीरधर,
प्रतिरत्न दीप्तितर, हरे छे आँधार ।
जाचितेछि किंच्छू सन, मुग्ध करिबाए मन,
काटिते कठिन दिन, अन्ध–कारागार ।।१ ।।
जानी ना कत की वेशे, जननी पुस्तकपाणि,
आशिया छे कारादेशे, भक्तवत्सल वाणी ।
दिदृशा मायेर मुख, सूची रूपे मम,

भाइयेर तेर भाई, लहिबे 'प्रफुल्ल' श्रम ।।२।।

कवेः पत्नी माणिककुंवर बालकाश्च यदा मार्गे आपतिताः तदा कोटाराज्यस्य कोटडानिवासी कविराजः दुर्गादा किमपि अविचार्य माणिककुवरं तथा बालकान् स्वनिवासे वासम् अकारयत् ।

केसरीसिंहः हजारीबागकारागृहे स्थापितः तत्र सः अन्नत्यागमकरोत् । कारागृहस्य निबिडे तिमिरे प्रस्थापितः सः प्रतिज्ञाम् अकरोत् यत् – अथ अहम् अन्नं स्वीकुर्यां चेत् मम पत्न्याः हस्तेन एव ।

राजस्थाने क्रान्तिकारिकाले तृतीयस्य चतुर्षु भागत्रयं शाहपुरायाः एकस्य केसरीसिंहचारणकुटुम्बस्यासीत् ।

- इतिहासविदः प्रा. खडगावतः, राजस्थानम्

६

त्यागभावना

शचीन्द्रसान्यालस्य बङ्गभाषायाः पुस्तके 'बन्दीजीवने – प्रतापस्य कहानी' इति शीर्षके लिखितं वर्तते यत् – 'अहं प्रतापः इव जनान् न दृष्टवान्। भारतस्य दुर्भाग्यं वर्तते यत् प्रतापसदृशाः युवकाः अद्य भारते न सन्ति।' प्रतापस्य जन्म २५–१–१८९३ तमे दिनांके उदेपुरे अभवत्। कोटायाः हरबर्टविद्यालये सः प्राथमिकं शिक्षणं प्राप्तवान्। अनन्तरं सः अजमेरे तथा जयपुरे अधीतवान्। कविः पुत्रं प्रतापं जामात्रा ईश्वरदानेन सह देहल्याः प्रसिद्धक्रान्तिवीरस्य मास्टर-अमीरचन्दस्य समीपं प्रेषितवान्।

यदा अमीरचन्दः तौ एवं केसरीसिंहस्य भ्रातरं जोरावरसिंहं क्रान्तिवीररासबिहारीबोझसमीपं नीतवान् तदा रासबिहारीबोसः उक्तवान् यत् – 'ठाकुरकेसरीसिंह एव एकः तादृशः जनो वर्तते, यः आत्मानं भ्रातरं, पुत्रं, जामातरं, सर्वान् च मातृभूमये स्वतन्त्रतायै बलिदानवेद्यां होतुं वीरत्वेन प्रतिज्ञाबद्धमकरोत्।'

रामनारायणचौधरीप्रतापसिंहेन सह अतीतान् दिवसान् संस्मृत्य लिखति यत् – 'एकस्मिन् काले प्रतापः सततं ७२ घण्टाः जागरणमकरोत्। भोजनं न कृत्वा कार्यं कुर्वन् आसीत्, पुनः यदा सुप्तवान् तदा दिनत्रयं नोत्थितवान् एव। सत्यं वदामि चेत् महात्मागान्धिमहोदयं प्रतापं च विहाय एतावती श्रद्धा कस्यापि उपरि नासीत्। यत्र सः वासं करोति स्म तत् स्थानं तत्रत्यं वातावरणं च पवित्रतापूर्णं प्रेममयं सरलतायुतं च सञ्जायते स्म।'

अन्यस्मिन् पुस्तके सः लिखति यत्- 'प्रतापः क्रान्तिदलस्य तेषां नेताऽऽसीत्, तत्कालीनः राजस्थाने सः राणाप्रतापावतारः आसीत् ।'

कारागृहे विपदं दमनं च सहन् सः २४–५–१९१८ तमे दिनांके मारितः। यस्मिन् कारागृहे तस्य मरणमभवत् तत्रैव सः भूमस्थः कृतः इत्यप्युच्यते । बरेलीजनाः तस्य मृतशरीरं याचितवन्तः किन्तु ब्रिटिशसर्वकारविरुद्ध-विप्लवभयकारणात् ते न दत्तवन्तः। एवं पञ्चविंशतिः वर्षीयस्यास्य क्रान्तिवीरस्य अस्तित्त्वं निर्मूष्टं कृतं तैः आंग्लैः। तदा विधाताऽपि रोदनं कृतवान् स्यात् ।

प्रतापसिंहविषये फतेसिंहमानवः 'केसरीसिंहबारहठ' इति पुस्तके केसरीसिंहस्य पत्राणां संपादनमकरोत् । तत्र ६४ तमे पृष्ठे सः विलिखति – ''ठाकुरकेसरीसिंहः एवं कथयन् आसीत् यत् कारागृहे सः स्वप्नं दृष्टवान् । तत्र प्रतापः गजारुढो भूत्वा समुद्रं प्रति गच्छन् आसीत् सहसा सः समुद्रे कूर्दनमकरोत्, अतः इदानीं प्रतापः नास्ति इति विश्वासं सः कृतवान् आसीत् ।''

*

७

प्रारोपितशिलास्तम्भानां प्रकम्पनम्

"के के क्रान्तिवीराः? तेषां नामानि वद" इति शब्दैः सह बरेल्याः कारागृहे एकस्य मानवस्य वस्त्रविहीनशरीरे प्रग्रहप्रहारः क्रियते स्म। एकः न, अपि तु चत्वारः जनाः अस्य जनस्योपरि प्रहारं कुर्वन्ति स्म। कारागृहस्य ग्रावा अपि रुदन्ति, तथा कृतैः क्रूरैः अत्याचारैः तस्य संपूर्णा तनुः सोथयुक्ताऽऽसीत्। वामनतनोः अस्य मनुष्यस्य नयनाभ्यां ज्वलन्तः अङ्गारकाः पतन्ति स्म। रक्तं यथा गात्रेभ्यः बहिरागत्य कथयति यत् एकवारं मुक्तं कुर्वन्तु अनन्तरं प्रत्युत्तरं ददामि।

कारागृहाधिकारिणः यदा बलपूर्वकं पृच्छन्ति तदा एकमेव उत्तरं प्राप्यते– "अहं न जानामि" इति। अयमासीत् भारतस्य क्रान्तिवीरस्य केसरीसिंहस्य सूनुः प्रतापसिंहः। तस्य समग्रं कुटुम्बं भारतस्वतन्त्रतायाः भेरीं वादयत् आसीत्। केसरीसिंहः राजस्थानस्य कोटायाः चारणकविः एवं मुख्यस्वातन्त्र्यसेनानी आसीत्।

जलियावालोद्यानस्थनिर्दोषजनहत्याकारणेन क्रान्तिवीराः उद्विग्नाः अभवन्। अत एव अवसरस्य प्रतीक्षां कुर्वन्तः जनाः प्राणचिन्तां परित्यज्य खेलं खेलन्ति स्म। भारतस्य वाईसरोयलोर्डहार्डिजमहोदयस्योपरि विस्फोटकं क्षेप्तुं प्रतापसिंहः प्रशिक्षणं प्राप्तवान्। कया रीत्या? कस्मिंश्चित् स्थले विस्फोटकं प्रक्षिप्य वाईरोयहार्डिजः मारणीयः? तस्य प्रयोगं कृतवान्। प्रतापसिंहस्य

वामनत्वात् एतत् कार्यं तस्य पितृव्यः जोरावरसिंहः अङ्गीकृतवान् । विस्फोटकः प्रक्षिप्तः किन्तु हार्डिजदम्पती जीवनदानं प्राप्तवन्तौ लक्ष्यच्युतिकारणात् । क्रान्तिवीराः भूगर्भस्थाः अभवन् । आंग्लाः तेषाम् अन्वेषणाय आकाशपातालम् एकत्रं कृतवन्तः । पुनश्च तेषां निद्राऽपगता ।

तस्मिन्नेव समये जोधपुरस्य समीपे आसानाडारेलस्थानकाधिकारीमहोदयस्य कपटेन क्रान्तिवीरः प्रतापसिंह गृहीतः तथा कारागृहं प्रेषितः । 'अन्ये के के क्रान्तिवीराः आसन्?' इति प्रश्नेन सह अन्येषां नामानि प्राप्तुं केसरीसिंहस्योपरि कारागृहे बलपूर्वकं दमनं क्रियते स्म । एवं सत्यपि तस्य मुखात् एकः शब्दोऽपि न निर्गतः ।

अरण्ये जोरावरसिंहः अदृश्यतां गतः । पिता केसरीसिंहः हजारीबागकारागृहे बन्दी वर्तते । प्रतापसिंहं तत्र नीतवन्तः । दीर्घकेशस्मश्रूः सः स्वतन्त्रभारतस्वप्नं यथा पश्यन् कारागृहजालात् बहिः पश्यति स्म । तदैव बन्दी प्रतापसिंहः तत्र प्रस्तुतः कृतः – "अयं तव पिता, त्वं यदि मातृश्रूणि नष्टानि कर्तुमिच्छसि तथा कारागृहात् मुक्तिं वाञ्छसि तर्हि क्रान्तिवीराणां नामानि कथय । तव पितरं प्रष्टुमिच्छसि चेत् पृष्ट्वा वद" इति । आरक्षकाणां शब्दाः कारागृहभीत्तौ आपतिताः तदैव केसरीसिंहः शब्दान् श्रुत्वा सिंह इव गर्जितवान् – "प्रतापसिंह ! श्रृणु । यदि त्वं तथाविधं करोषि तथा क्रान्तिवीराणां नामानि वदसि तर्हि कारागृहात् निर्गत्याहं प्रथमां गोलिकां तव वक्षस्थले मारिष्यामि' इति ।

एतान् शब्दान् श्रुत्वा पराक्रमं च दृष्ट्वा आंग्लाः आरक्षकाः अपि उद्विग्नाः जाताः । तैः चिन्तितमासीत् यत् पुत्रस्य अवदशां दृष्ट्वा पिता झटिति एव वदिष्यति "इमे जनाः यथा वदन्ति तथा त्वं कुरु । मुक्तो भूत्वा कुटुम्बं संरक्ष" इति । अत्र तु सर्वथा विपरीतम् अभवत् । क्रान्तिवीराणां प्रज्वालितः अग्निदण्डः (मशाल) इव इमे शब्दाः आसन् । तेषां कटुवाणीषु सहस्रवर्षाणां वेदनाऽऽसीत् । देशस्वतन्त्रतायै केवलं प्राणत्यागस्यैव न, अपि तु कपटं कुर्वन्तः ये जनाः सन्ति तान् मारयितुमपि इयं घोषणाऽऽसीत् । तस्य समक्षं तस्य पुत्रः

स्थितो नासीत् । भारतस्वतन्त्रतायाः तारकोऽयं स्थितः आसीत् । पराक्रममेव तस्य हृदयात् निस्सरति स्म यथा । परतन्त्रपीडातः निपतन्तः अङ्गारकाः आसन् इमे । नष्टं भवामः किन्तु शान्त्या न उपविशामः इति मन्त्रः तेन जिह्वायाः उपरि अजस्त्रं रट्यते स्म । देशस्वतन्त्रतायै भवतु मृत्युः किन्तु न उपविशामः इति भावना सदा सर्वदा जीवेत् इत्याशयः आसीत् तेषाम् । स्वस्य पुत्रः आंग्लदमनेन नतो भवेत् इति कदापि तस्यानुकूलं नासीत् ।

'सर्वे निष्क्रान्ताः भवन्तु' इति मृत्युं सहैव स्वीकृत्य अटन् सः क्रान्तिवीरः पुनरवदत् । कारागृहाध्यक्षः तथा सिविलसर्जन मि. जोर्डनः तस्योपरि असह्यां वेदनां कृतवन्तौ एतत् सर्वं प्रसह्यापि मुखात् एकं शब्दमपि नोक्तवान् सः । विवेकसम्पन्नः संस्कारगुणोपेतः आसीत् प्रतापसिंहः जन्मतः । समयेऽस्मिन् अवक्तव्येन विपरीतार्थो भविष्यति इति मत्वा सः अवदत्–

"पितः ! एते बलात् माम् अत्रानीतवन्तः । अहं वीरपितुः पुत्रोऽस्मि । देशभक्तेः रक्तं मम गात्रेषु प्रवहति । एते ममोपरि दमनं कर्तुं किमपि अवशिष्टं न त्यक्तवन्तः । मह्यं नैकानि प्रलोभनानि दत्तवन्तः । क्रान्तिवीराणां नामानि वक्तुं विमुक्तं कर्तुं च प्रलोभनानि प्रददति एवं च मातृश्रूणि मार्जयितुं कथयन्ति, किन्तु अहं किमपि रहस्योद्घाटनं नैव करिष्यामि । अहं मृत्योः वरणं करिष्यामि किन्तु मुखोद्घाटनं नैव करिष्ये" इति । वामनः प्रतापसिंहः यथा आकाशं स्पृशति इत्यनुभूतवान् केसरीसिंहः । कारागृहम् अपि यथा अस्य वीरस्य गीतानि गातुं प्रारब्धवान् । केसरीसिंहस्य वक्षस्थलं गौरवमनुभवति स्म । तयोः मध्ये लोहजालमासीत् अन्यथा सः पुत्रमालिङ्ग्य धन्यवादमकरिष्यत् । तस्य मस्तकम् उन्नतं सञ्जातम् । नयनाभ्याम् अश्रूणि समागतानि ।

"तव सदृशं पुत्रमवाप्य तव माता तथा अस्माकं सर्वेषां माता, भारतस्येयं पूता धरा गौरवयुताऽस्ति । तव समक्षं ममैषा एवोपेक्षाऽऽसीत् । अन्यायविरुद्धे प्राणत्यागः इत्यस्माकं परम्परा । तव सदृशस्य वीरपुत्रस्य मातरं स्मृत्वाऽहं गौरवमनुभवामि ।" भारतस्य कस्यचित् योगिनः मुखात् निर्गतान् शब्दान् प्रतापसिंहः श्रुतवान् । लोहदण्डयुतं द्वारं मध्ये आसीत् तथापि

प्रतापसिंहः पितुः समक्षं नतमस्तकः अभवत्। तदैव तत्रत्याः आरक्षकाः तस्य हस्तनिगडं कर्षितवन्तः। आंग्लाधिकारिणोऽपि ज्ञातवन्तः यत् क्रान्तिवीराणां मनोबलत्रोटनं तु लोहचणकमिव कठिनम्। तस्यापेक्षया कारागृहलोहदण्डत्रोटनं सरलमिति।

प्रतापसिंहः पुनः कारागृहे बन्दीकृतः। क्रान्तिवीराणां रहस्योद्घाटनाय महति कष्टे प्रदत्ते सति अयं वीरः विचलितः नाभवत्। मातृभूमये अग्निदण्डं प्रज्वाल्य तस्य प्रकाशेन एते आंग्लाः पलायिताः यथा भवेयुः तथा कल्पनां सः सेवितवान् आसीत्, किन्तु स्वतन्त्रतायाः पूर्वमेव अयं क्रान्तिवीरः बरेलीकारागृहे सदा निद्राधीनः कृतः। १९–७–१९१९ तमे यदा कविः केसरीसिंहः कारागृहात् मुक्तः तदा कोटायां तस्य स्वागतार्थं समागतः डॉ.गुरुदत्तः तस्य पुत्रमृत्योः वृत्तं तस्मै कथयामास।

आंग्लाः तस्य सम्पदं तथा सर्वं निगृहीतवन्तः। जामाता ईश्वरदानः, पुत्री चन्द्रमणिः सर्वेऽपि स्वतन्त्रतायाः यज्ञे कार्यं कुर्वन्तः आसन्। कारागृहात् मुक्त्याः अनन्तरं गान्धिनः समीपं वर्धाश्रमं गतवान्, तत्रैव 'राजस्थानकेसरी' इति साप्ताहिकलेखनं कार्यं कुर्वन् अभवत्। ख्रिष्टाब्द १९४० तमे गान्धिद्वारा घोषिते व्यक्तिगतसत्याग्रहे भागग्रहणाय केसरीसिंहः पत्रमलिखत् – "मम सप्ततिवर्षीयम् इदं गात्रम् इदानीमपि स्वतन्त्रतायाः कृते आहुतिं दातुं समर्थं वर्तते" इति।

जलमिव युवपुत्राघातं केसरीसिंहः शरीरे अवतारितवान्। स्वागतार्थं समागताः कोटायाः जनाः परस्परं पृच्छन्तः आसन् यत् 'पिता श्रेष्ठो वा पुत्रो वा'?

मातृभूमिस्वतन्त्रतायै मन्त्रं रटताम्, पराक्रमेण गर्जनां कुर्वतां बलवीराणां प्रस्थापिताः शिलास्तम्भाः अद्यापि प्रकम्प्य प्रतिध्वनिं कुर्वन्तः राष्ट्रियेनैक्येन सह सीमाप्रदेशे सावधानाः भवेम इत्युद्घोषयन्ति।

विशेषः

(१) बनारसषड्यन्त्राभियोगे प्रतापः पञ्चवर्षं कारागृहदण्डं प्राप्तवान्, तदर्थं सः बरोलीकारागृहे प्रेषितः। रासबिहारीबोसः भारतं त्यक्त्वा जापानं गतः आसीत्। शचीन्द्रनाथोऽपि आजीवनं देशनिष्कासनदण्डं प्राप्तवान् आसीत्। २४–५–१९१८ तमे दिनाङ्के क्रान्तिवीरस्य प्रतापसिंहस्य मृत्योः वार्तां श्रुत्वा गोपालसिंहखरवा भावपूर्वकम् अकथयत् – "विधाता शतं क्षत्रियान् वीरान् एकीकृत्य एकं प्रतापम् अरचयत्" इति।

श्रीरमणिकमहेता बङ्गालस्य साहित्यकारस्य शरदचन्द्रस्य 'ई.स. १९५७ तमस्य स्वातन्त्र्यसंग्रामः' इत्यस्य अनुवादं कृत्वा इदं पुस्तकं क्रान्तिवीराय प्रतापाय समर्पितवान्।

मातृभूमिस्वतन्त्रतायै मन्त्रं रटताम्, पराक्रमेण गर्जनां कुर्वतां बलवीराणां प्रस्थापिताः शिलास्तम्भाः अद्यापि प्रकम्प्य प्रतिध्वनिं कुर्वन्तः राष्ट्रियेनैक्येन सह सीमाप्रदेशे सावधानाः भवेम इत्युद्घोषयन्ति।

८

कारागृहमुक्तिः

चारणकविः आसीत् अतः पिङ्गलज्ञानं तु आसीदेव तदतिरिच्य विविधभाषाविदप्यासीत्। तस्य साहित्याभिरुचिम्, ऐतिहासिकं ज्ञानं, पाठनपद्धतिं, चर्चापद्धतिं च दृष्ट्वा आङ्ग्लदम्पती कर्नलमीक तेन सह वारं वारं चर्चां करोति स्म। श्रीमती मीकेमहोदया केसरीसिंहात् संस्कृतभाषायाः अध्ययनमपि कृतवती। एतौ आङ्ग्लदम्पती केसरीसिंहाय तस्याभियोगे प्रतिनिवेदनं कर्तुमपि उक्तवन्तौ।

कारागृहे केसरीसिंहस्य जीवनं तपस्वी इवासीत्। नैराश्यविहीनं चिन्तामुक्तं च तस्य जीवनमासीत्। प्रत्येकं बन्दीभिः सह व्यवहारः, कारागृहाधिकारिभिः सह सम्मानितदृष्टिः, तेजस्विव्यक्तित्वं, उच्चविचाराः एतत्सर्वं कारागृहाध्यक्षस्य मीकमहोदयस्योपरि प्रभावं जनयितुं पर्याप्तमासीत्।

श्रीमतः मीकमहोदयस्य आग्रहकारणात् एव कविः वायसरॉयमहोदयं न्यवेदयत्। समयेऽस्मिन् प्रथमविश्वयुद्धं पूर्णतां गतमासीत्। मित्रराज्यकारणात् ब्रिटीशसर्वकारेषु अपि नम्रता आगता। राजस्थानेषु क्रान्तिकारिगतिविधयः प्रशामिताः। तस्य निवेदनम् अवलोक्य १९-७-१९१९ तमे दिनाङ्के केसरीसिंहः कारागृहात् विमुक्तः कृतः।

तस्य कारागृहमुक्तिं ऐ.जी.जी. राजपूताना यदा ज्ञातवान् तदैव सर आर्ची–बोल्ड–क्लीवलेण्डमहोदयं प्रालिखत् – "केसरीसिंहस्तु आयोजितापराधस्य (और्गेनाईज्ड क्राईम्) बन्दी वर्तते। अतः कथम् अयं

मुक्तः स्यात्? अनेन कारणेन ब्रिटिश सी.आई.डी. इत्यस्य तथा राजकीयविभागस्य उच्चस्तरस्य कोटाराज्योपरि दमनमभवत् यत् केसरीसिंहस्य आजीवनकारागृहस्य दण्डः पूर्णःकरणीयः, अतः तस्य पुनर्ग्रहणम् आवश्यकं वर्तते इति।

सन्दर्भेऽस्मिन् पण्डितमदनमोहनमालवीयः कोटायाः अमात्याय पत्रं विलिख्य न्यवेदयत् यत् यदि केसरीसिंहस्य पुनर्ग्रहणं क्रियते तर्हि सः स्वयं तत्रागत्य सत्याग्रहं करिष्यति। पण्डितमदनमोहनमालवीयः राष्ट्रियनेताऽऽसीत्। तस्य कथनेन अग्रकार्यं न कृतम् यदि पण्डितजी सत्याग्रहं कुर्यात् तर्हि समग्रे क्षत्रियसमाजे कोलाहलः स्यादिति आङ्ग्लाः जानन्ति स्म।

केसरीसिंहस्य जीवनघटनाः प्रकाशयितुं लेखकः फतेसिंहमानवः प्रो. नाथुरामखडगावतेन सह संपर्कं कृतवान्। तेन संपर्केण इदं ज्ञातम् यत् – केसरीसिंहस्य कारागृहजीवनविषये राजा दुर्जनसिंहजावबी (अलवर) लिखितवान् यत् – 'तस्य कारागृहजीवनस्य तपः अरण्यनिवासिनाम् ऋषीणाम् अपेक्षयाऽप्यधिकमासीत्।'

अनेन कारागृहे तस्य व्यवहारवर्तनाचरणानि कीदृशानि आसन् इत्यनुभूयते। 'राजस्थानकेसरी' इत्यस्य ग्रन्थकारः लेखकः पृथ्वीसिंहः महेता अलिखत् यत् – ''राजस्थानस्याग्रगण्याः अर्जुनलालसेठी, विजयसिंहपथिकः रामनारायणचौधरी, बाबानरसिंहदासः, चांदकरणः, शारदाप्रभृतिः, गणेशशकंरविद्यार्थी, सेठगोविन्ददासः इत्यादयः ई.स. १९२० तमे वर्धायाः आश्रमं प्राप्तवन्तः। सेठजमनालालबजाजस्य निमन्त्रणेन ठाकुरकेसरीसिंहः सकुटुम्बं तत्रागतः। एवञ्च कतिपयाः मासाः तत्रैव न्यवसत्। अस्मिन् समये एव राजपूतानामध्यभारतसभायाः सङ्घटनं प्रस्थापितम्। यस्याः अखिलभारतीयकोंग्रेससंस्थायाः असहकारान्दोलने समन्वयः कृतः।

ख्रिष्टाब्द १९२० तमे कोंग्रेस इत्यस्याधिवेशने केसरीसिंहः पुत्र्या चन्द्रमण्या सह कोलकातां गतः। वर्धायाः अनन्तरं यत्र यत्र रेलयानस्य

स्थगनं भवति स्म तत्र तत्र 'राजस्थानकेसरी जयतु' इति जयघोषः चन्द्रमण्या कर्णाभ्यां श्रूयते स्म। जनाः रेलयाने आरुह्य दुग्धं ददति स्म। श्रीरामनारायणचौधरी 'वीसमी सदी का राजस्थान' इति स्वग्रन्थे लिखति यत् – 'वर्धायां ठाकुरकेसरीसिंहस्य सम्माननं राजा इवाभवत्। अनेन ज्ञायते यत् तस्मिन् समये क्रान्तिवीरं केसरीसिंहं प्रति जनानां कीदृशी भावना स्यात्। तं प्रति ममत्वस्यादरस्य च प्रतिभावोऽयमासीत्।

खिष्टाब्द १९२४ तमे लिखिते पत्रे श्री अर्जुनलालसेठी केसरीसिंहं 'हृदयमन्दिरस्य पूज्यदेव' इति सम्बोधयति एवञ्च आत्मानं सहचरः, पूजकश्च इति भावयति। अर्जुनलालस्य गणना अखिलभारतीयनेतृषु भवति स्म। अस्य जनस्य कृतसम्बोधनेन केसरीसिंहस्य विरला प्रतिभा प्रकटीभवति।

'केसरीसिंहबारहठ' इति स्वग्रन्थे फतेसिंहमानवः एकस्याः महत्त्वपूर्णघटनायाः उल्लेखं करोति, तद् ध्यानार्हम्। ई.स. १९२८ तमे यदा लॉर्डइरविनः जोधपुरमागच्छन् आसीत् तदा दैववशात् केसरीसिंहोऽपि जोधपुरे आसीत्। जोधपुरस्याङ्ग्लः मुख्यामात्यः केसरीसिंहाय आदेशं दत्तवान् यत् केसरीसिंहेन चतुर्विंशतिघण्टासु जोधपुरं त्यक्तव्यम्। तत्कालीनवृत्तपत्राणि अलिखन् यत् – केसरीसिंहं मारवाडप्रदेशात् निष्कासितवन्तः, तस्मिन्नेव समये केसरसिंहेन जोधपुरं त्यक्तव्यमभवत्।

इयं घटना तु लघ्वी एव किन्तु महत्त्वपूर्णा, यतः केसरीसिंहस्य प्रत्येकं कार्यस्योपरि ब्रिटिशसर्वकारस्य कीदृशी दृष्टिः आसीत्? तस्य ज्ञानं भवति। ब्रिटिशसर्वकारः एतादृशमेधासम्पन्नक्रान्तिवीराय सर्वदा सचिन्तः भवति स्म।

केसरीसिंहस्य कारागृहजीवनविषये राजा दुर्जनसिंहजावबी (अलवर) लिखितवान् यत् – 'तस्य कारागृहजीवनस्य तपः अरण्यनिवासिनाम् ऋषीणाम् अपेक्षयाऽप्यधिकमासीत्।'

९

स्वतन्त्रताप्रकाशः न दृष्टः

अयं क्रान्तिवीरकविः एकान्ते तपः कर्तुं कतिपयं कालं यापितवान्। तत्तस्य स्वटिप्पण्या ज्ञायते। १५–७–१९३४ तः ५–१२–१९३४ दिनाङ्कं यावत् तस्य तपः प्राचलत्। राजस्थान–मध्यभारतस्य पूर्वसीमाप्रदेशे रामगढपर्वतेषु सः तपः आचरितवान्। फतेसिंहमानवः तस्य ग्रन्थे सर्वमेतत् वर्णितवान् अस्ति।

टिप्पण्याः प्रारम्भे स्वपत्न्याः माणिककुंवरमहोदयायाः अग्निसंस्कारस्य दिनानि स्मरन् सः लिखति। तस्मात् दिनात् एव सः तपसः आरम्भं कृतवान्। १५–७–१९२७ तमे दिनाङ्के अर्थात् सप्तवर्षेभ्यः पूर्वं माणिककुवंरदेवी दिवं गता। तस्मात् दिनात् अग्निचिता तस्य हृदये इदानीमपि प्रज्वलिता वर्तते। शून्यतायामेव सः ईश्वरान्वेषणं कुर्वन् अस्ति। तपसः आचरणसमये तस्य समीपे उपनिषद्गीतारहस्यादिग्रन्थाः आसन्।

यस्मिन् वने सः तपश्चर्यां करोति स्म तेन सह स्वकारागृहस्थलानि दृश्यन्ते स्म। तानि दृश्यानि एव समक्षं स्थितानि वर्तन्ते। स्थानस्वागतयोः गगनभूम्योः इव भेदो वर्तते। तथापि नूतनस्य अभ्यागतस्य कृते शान्तिसुखप्राप्त्यर्थं सहृदयानां भावनासु भेदः न भवति। ईश्वरस्तु कारागृहे वने वा एकरूपः दृश्यते।

या सहानुभूतिः सहायता च कारागृहस्य सार्धत्रिंशतबन्दीजनेषु दृष्टा सैव एतेषु साधुषु अपि दृग्गोचरीभवति। अतः भगवतः अलौकिकतां

प्रति शिरः नमति।

तपस्यायाः काले विगलितसमर्थानि कानिचित् अवलोकनानि तेन कृतानि। कालगुहागमने मानवोऽपि अवशिष्टः न भवति। उन्नतात् पर्वतात् धरास्थितो मानवः वामनः प्रतिभाति तदा तस्य हृदयं कथयति यत् 'उच्चस्थानं प्राप्य सर्वान् यः तुच्छं गणयति तस्य कोऽत्र दोषः? दृष्टौ अपि एतादृशमागच्छति। अत्र कविज्ञानस्य अन्तःकरणं पठितुं शक्यते। सः टिप्पण्यौ अलिखत् 'क्षणभङ्गुरसंसारपाठं वयं सहस्रपुस्तकैः न अवगच्छामः किन्तु तत् पर्वतस्थजीर्णभवनानि अस्मान् सरलतया पाठयन्ति' इति।

तपस्याकाले सः मुष्टिकापरिमितं यावत् आर्द्रमुद्गचणकान् खादति स्म तथा तक्रमेव पिबति स्म। तस्य गुरुः ज्ञानानन्दः आसीत्।

द्वितीयवारं ६५ वर्षीयः सः जुलाईमासे १९३७ तमे मौजीबाबागुहायां (चम्बले) कोटायां एकान्तवासं कृतवान्। द्वितीयवारं सः तपसः विषये आत्मजाय रणजितसिंहाय पत्रं लिखति। तत्रापि मातृभूमिस्वतन्त्रतायै कियती इच्छाऽसीत् तस्य प्रतीतिः सञ्जायते। सः तत्र लिखति – 'पराधीनमातृभूमि-स्वतन्त्रतायज्ञे अहं मम आहुतिं तु दत्तवान् किन्तु विपरीतवायुज्वालने भवन्तः अपि आहुताः, एतावद् न किन्तु गृहस्यैव देशद्रोहकर्तृभिः स्वार्थाय भवन्तः निराधाराः कृताः। सहजतया अत्र ज्ञायते यत् इयं कविवेदना कोटानरेशं प्रति विद्यते। परपरिश्रमेण निद्रां कुर्वतां दिवसाः गताः। अतः परिश्रमे संलग्नाः भवन्तु इति।

सः लिखितवान् यत् यदि सः संन्यासं स्वीकुर्यात् तर्हि शरीरस्याग्निसंस्कारं कृत्वा स्वास्थीनि मणिकुंवरदेव्याः अस्थिभिः सह मिश्रितानि करणीयानि। तीर्थस्थाने क्षेपणस्यावश्यकता नास्ति।

तपस्यार्थं स्वयं कण्टकवृक्षादीनां स्वच्छतां कृत्वा रमणीयां गुहां रचितवान्। तस्य पौत्री राजलक्ष्मीः प्रतिदिनं प्रातः दुग्धं दातुं गच्छति

स्म। सायंकाले तस्य मित्राणि चर्चां कुर्वन्ति स्म। तस्य गुरुः ज्ञानानन्दः संन्यासं स्वीकर्तुम् आज्ञां न दत्तवान् अतः सः संन्यासं न स्वीकृतवान्।

तस्य अन्तिमे दिवसे कविरयं ज्वरपीडितः आसीत्। तस्य कुटुम्बवैद्यः एकस्मिन् दिवसे तस्मै वार्तां कथयति "ठाकुरमहोदय ! अद्य दुःखपूर्णां वार्ताम् आनीतवान् अस्मि यत् रवीन्द्रनाथठाकुरः इदानीम् अस्याः धरायाः उपरि जीवितः नास्ति" इति।

केसरीसिंहः शून्यमनस्को भूत्वा वदति, 'इतःपरं कविदरबारः उपरि एव भविष्यति।' पञ्चदिनान्तरं क्रान्तिवीरोऽयं नैसर्गिकं कविं आलिङ्गनं दातुं गच्छति। विधिः एतादृशान् आत्मनः साकमेव आह्वयन् भवति इति भाति।

तस्य रुग्णतायां तस्य पौत्री राज्यलक्ष्मीः सेवारता भवति स्म। अयं क्रान्तिवीरः कविः अन्तिमदिवसेषु गीतायाः उपनिषदः च श्लोकान् वदति स्म। राजलक्ष्मीः कथयति यत् १४–८–४१ तमे दिनाङ्के वैद्यचन्द्रशेखरस्य कथनात् प्रकोष्ठस्य द्वाराणि पिहितानि तथा जवनिकाः स्थापिताः। बहिः वृष्टिः आसीत्। कविः उक्तवान्–"द्वारपिधानेन गच्छन्तं केसरीसिंहं वारयितुं शक्यते वा?" इति।

अन्तिमेषु क्षणेषु स्वातन्त्र्यप्रियस्य पितुः कृष्णसिंहस्य छायाचित्रं मस्तकोपरि अक्ष्णोः उपरि च संस्थाप्य तत्प्राचीनं दोहाकाव्यम् अवदत्–

"कहाँ जाये, कहाँ उपने, कहाँ लडाये लाड,
का जाने केही खाड में, जाय पडेंगे हाड"।

तदा एव द्वादशवादने अनेन क्रान्तिवीरेण भारतस्य धरा सर्वदा परित्यक्ता। भारतभूमेः अस्य नरपुङ्गवस्य गमने वृत्तपत्राणि तं 'राजस्थानरवीन्द्रः', 'राजस्थानारविन्दः' चेति प्रशंसाम् अकुर्वन्। 'क्षात्रधर्म' इति मासिकपत्रिका तस्य स्मृतौ 'राजस्थानकेसरी' इति विशेषांकं प्रकाशितं कृतवती। केसरीसिंहः न केवलं क्रान्तिवीरः अपि तु तत्त्वचिन्तकः, कविः, विचक्षणराजपुरुषः, युगदृष्टा, नेता, लोहमनोबलोपेतः विरलः

चासीत्। तस्य निधनेन माता भारती अपि अश्रूणि वहती चिन्तयती स्यात् 'सा स्वकीयप्रियपुत्रमरणम् अवलोकितवती। तस्य कुटुम्बेन स्वतन्त्रतायै यद् आन्दोलनं कृतं तस्य केन्द्रस्थाने आसीत् क्रान्तिवीरोऽयम्।

केसरीसिंहः यदा कारागृहात् निर्गतः तदा इदम् आन्दोलनं मन्दं जातम्। कविः एकाकी अभवत्। तस्य सहायकाः गान्धिमहोदयेन सह वर्धां प्राप्तवन्तः। गान्धिनः अहिंसायाः आन्दोलनं जवेन प्रसृतमासीत्। ते तत्र संलग्नाः अभवन्। तस्य कनीयान् भ्राता जोरावरसिंहः देशनिष्कासनस्य आज्ञां शिरसि धृतवान्। यावत् देशोऽयं स्वातन्त्र्यं न प्राप्नोति तावत् अविवाहितो भविष्यामि इति भीष्मप्रतिज्ञाऽऽसीत् तस्य पुत्रस्य प्रतापसिंहस्य। तया प्रतिज्ञया सः स्वतन्त्रतासमरे कूर्दनं कृतवान्। प्रतापसिंहः बरेलीकारागृहे एव मारितः। (ई.स. १९१९) दरबारः गोपालदास इव केसरीसिंहोऽपि स्वतन्त्रतायै स्वार्जितसम्पदः त्यागमकरोत्। राजस्थानस्य जनाः तस्मै 'राजस्थानकेसरी' इति गौरवपूर्णं पदं समर्पितवन्तः।

तस्य शरीरं हृष्टपुष्टमासीत्। भूस्वामी इव तस्य प्रतिभाऽऽसीत्। कण्ठे कण्ठहारादि आसीत्। मस्तकोपरि उष्णिक्बन्धनं (साफो) करोति स्म। कोटवस्त्रं धृत्वा यदा सः बहिर्निर्गच्छति स्म तदा तस्य दृष्टिः आङ्ग्लानां पुरतः यथा वह्निं प्रज्वालयति स्म। पत्न्याः मृत्योः अनन्तरं तथा पुत्रबलिदानानन्तरं ई.स. १९३५ तमे सः संन्यासं स्वीकर्तुं सिद्धः एवासीत्। गुरोः आदेशं स्वीकृत्य तथा अन्येषां कथनं अवगम्य सः संन्यासं न स्वीकृतवान् किन्तु एकान्तवासं प्रारभत।

ई.स. १९४० तमे व्यक्तिगतसत्याग्रहे भागग्रहणाय सः महात्मने गान्धिमहोदयाय पत्रमलिखत् – ''मम सप्ततिवर्षीयेषु अस्थिषु स्वदेशाय शान्ताहुतिं प्रदातुम् इदानीमपि बलमस्ति'। महात्मागान्धी एतत्पठित्वा आनन्दमनुभूतवान्।

जीवनान्ते तस्य विचारेषु महत् परिवर्तनमागतम्। अहिंसा मानवधर्मस्य सर्वोपरि अङ्गरूपेण वर्तते इति घोषितं तेन। १४–८–१९४१

तमे दिनाङ्के सः स्वतन्त्रताप्रकाशं न दृष्ट्वा एव जीवनलीलां समापितवान्। (स्वतन्त्रतायाः घोषणा तस्य मृत्योः अनन्तरं षष्ठे वर्षे जाता) सः सदा सर्वदा कथयति स्म 'यस्मिन् समाजे वीरपूजा न भवति सः समाजः मृतप्रायो वर्तते।'

राजस्थान–सौराष्ट्र–कच्छादिप्रदेशेषु पराधीनता द्विधा आसीत्। समग्रे हिन्दप्रदेशे आंग्लपताका शोभते स्म, तेषां पताकातले देशीराज्यानां तथा भूस्वामिनां सत्ताप्रग्रहः प्रजायाः उपरि प्रहरते स्म। एतस्यां परिस्थितौ स्वतन्त्रतायै प्रजासु भेरीवादनफुक्कारकार्यं केसरीसिंहस्य सदृशाः नैके पुरुषाः कृतवन्तः। अयं क्रान्तिवीरः लोकहृदये विराजितः कविः आसीत्। लोकभाषामाध्यमेन तेन चेतना प्रपूरिता। यस्य वंशपरम्पराऽपि आङ्ग्लानां निद्रां नाशितवती। तत्र प्रथमवंशः कृष्णसिंहस्य, द्वितीयवंशः केसरीसिंहस्य तथा जोरावरसिंहस्य, तृतीयवंशः प्रतापसिंहस्य च। इतिहासविदः नाथुरामखड्गावतेनोक्तम् यत् – राजस्थानस्वतन्त्रतासङ्ग्रामस्य तृतीयस्य चतुर्थांशः भागस्तु केसरीसिंहस्य कुटुम्बस्यैवासीत्।

ठाकुरकेसरीसिंहः, भ्राता जोरावरसिंहः, केसरीसिंहस्य वीरः पुत्रः प्रतापसिंहश्च मातृभूमये स्वतन्त्रतायै सर्वं प्रदत्तवन्तः। एतेषां वीराणां स्मारकाणां निर्माणप्रारम्भः तेषां जन्मभूमौ शाहपुरायां (राजस्थाने, जि. भीलवाडायां) राजस्थानस्य मुख्यमन्त्रिणा स्व.वरकतालीखानेन कृतः आसीत्। त्रयाणामपि वीराणां शिलाविग्रहस्य २५–४–१९७६ तमे दिनाङ्के राजस्थानस्य तत्कालीनः मुख्यमन्त्री हरदेवजोशीमहोदयः लोकार्पणमकरोत्। प्रसङ्गेऽस्मिन् केसरीसिंस्य पौत्री नगेन्द्रबालाजी (धारासभ्यः) उपस्थिताऽऽसीत्। केसरीसिंहः नितरां देशभक्तः क्रान्तिवीरश्चासीत्।

स्वतन्त्रतायाः पञ्चाशत्वर्षानन्तरं स्वर्णजयन्त्यवसरनिमित्ते ८–८–१९९८ तमे दिनाङ्के राजस्थानस्य कोटानगरे तस्य विग्रहस्यानावरणमभवत्।

केसरीसिंहस्य सदृशाः बहवः क्रान्तिवीराः मृत्युं मुष्टिकां स्वीकृत्य

भ्रमन्तः आसन्। स्वतन्त्रताप्राप्त्यर्थं केषांश्चित् जनानां बलिदानकथा–व्यथाः तेषां जीवनेन सह नष्टप्रायाः स्युः इति न जानीमः।

केसरीसिंहस्य इव वीरपितुः वीरपुत्रः प्रतापः यदा मारितः स्यात् तदा तस्य प्रतापस्य तस्मिन् जनरहितकारागृहे प्रतिध्वनिरूपाः अन्तिमकालशब्दाः कीदृशाः स्युः? ते अद्य कथं श्रुतिसहजाः स्युः?

विशेषः

केसरीसिंहस्य पौत्री नगेन्द्रबाला भारते सर्वप्रथमा जनपदपरिषदः प्रमुखाऽऽसीत्।

यस्य तिस्रः वंशपरम्पराः मातृभूमिमुक्त्यर्थं आङ्ग्लानां निद्रां नाशितवत्यः। ते आसन् कृष्णसिंहः केसरीसिंहः प्रतापसिंहश्च।

– पण्डितः ज़ाबरमलशर्मा

१०

साहित्यविभागः

सरफरोशीभावनाम् अभिव्यक्तिकर्तुं साहित्यम्

१. दोहा–छन्दः – पत्रकारत्वसन्दर्भे

२. कारागृहात् लिखितानि पत्राणि

३. कारागृहमुक्तेः अनन्तरं लिखितानि पत्राणि

४. राजानः ब्रिटिशसर्वकारश्च (तदानीमिदानीञ्च)

५. केसरीसिंहस्य विद्वत्ता

६. केसरीसिंहस्य काव्यानि

१. दोहा–छन्दः – पत्रकारत्वसन्दर्भे

केसरीसिंहः जन्मतः एव उत्तमान् संस्कारान् प्राप्तवान् आसीत् अर्थात् मातृपक्षतः पितृपक्षतः च सरफरोशीभावनायाः साहित्यं सः प्राप्तवान्। 'चेतवणी रा चूंगटया' इति शीघ्ररचितदोहाकाव्यं तस्य काव्यशक्तेः उदाहरणमस्ति। कवेः दोहाकाव्येषु याः कल्पनाः शब्दाश्च वर्तन्ते तत्रापि तस्य नैसर्गिकप्रवाहो विद्यते।

तस्य काव्यानि प्रायः मातृभूमिभावनां साम्प्रतपरिस्थितिं च प्रकटीकुर्वन्ति। काव्यनिर्माणशक्तौ सति क्रान्तिकार्यवशात् तस्य लेखनी विशालं साहित्यं न सृष्टवती। तथापि तस्य पत्राणि, वक्तव्यानि वा यानि काव्यानि प्राप्तानि तेषु साहित्यास्वादः दृश्यते। कातरोऽपि वीरत्वं यथा प्राप्नोति तथा तस्य वाणीं श्रुत्वा जनाः भावमुग्धाः भवन्ति स्म।

केसरीसिंहस्य साहित्ये स्वतन्त्रतायाः रणगीतानि श्रूयन्ते। मातृभूमिपराधीनतामुक्त्यर्थं क्रान्तिवीराः कृतनिश्चयाः आसन्। श्रूयन्तां तस्य काव्यानां स्वरम्।

प्रधान मानवीय सत्व है, स्वतन्त्रता अहा।
वरेण्य धर्म कर्म मर्म मंत्र ही यही रहा।।
महान प्राण प्राण वारिके तुम्हे हि खोजते,
नमामि विश्ववंदनीय अन्त मां ! स्वतंत्रते !

गद्यसाहित्ये तस्य मौलिकविचाराः रत्नमिव जीवनपथं प्रकाशयन्ति। तस्य विचाराणां भाषानुवादं पश्यतु, 'एतादृशी प्रतीतिः जायते यत् वयं अस्माकं स्थाने स्मः, किन्तु देशकालयोः नूतनसंघर्षः यदा सचेतं करोति तदा ज्ञानं भवति वयं कुत्र आस्म एवं कुत्र आगताः इति। अस्य नाम सहजक्रान्तिः। क्रान्तिबीजानि ध्येयविहीनस्वरूपात् ध्येये एव पोषणं

प्राप्नुवन्ति, एवं विपाकावस्थायां तीव्रकर्मानुष्ठाने अवतीर्य परिणामस्य सुखदु:खेषु प्रतिफलितानि भवन्ति। लोकतन्त्रमेव पूर्णसुखशक्त्याः शान्त्याः च जन्मदाता वर्तते। समता स्वतन्त्रता बन्धुत्वं चेति प्रत्येकं मानवस्य जन्मसिद्धः अधिकारो वर्तते। यत्र स्वयमाचरणं भवति तत्र देशभक्तानां बलिवेदी स्यादेव। तदेव कर्मवीराणां मुख्यक्षेत्रं भविष्यति। तत्र प्रजासु जीवनमन्त्रं प्रस्थापयितुं यज्ञमण्डपो भविष्यति। भारतीयजनशक्तिं विहाय नास्ति अन्यद् किमपि समर्थम्। ब्राह्मणानां क्षत्रियाणां स्वार्थविषयः अपगतः। इदानीं तु संसारस्य आधारस्तम्भरूपः अन्नदाता कृषकः एव सर्वोपरि वर्तते। कृषकसंस्था चिरंजीविनी वर्तते तथा भविष्यति। संसारोदरपूरणार्थं ये कार्यं कुर्वन्ति तेषां महत्त्वपूर्णेतिहासः उज्वलो वर्तते तथा भविष्यति।

तस्य काव्यानि विलासिनां नृपाणां तथा पराधीनानां क्षत्रियशासकानां कृते व्यङ्ग्यात्मकानि सन्ति। सः स्वतन्त्रतायाः निर्भीकः योद्धा, राजपूतानां च संरक्षकः आसीत्। भगवत्याः शारदायाः उपासकस्यास्य वाणीषु ओजोगुणोपेतः प्रवाहः प्रवहति स्म। सत्यनिर्झराणि प्रस्फुटितानि भवन्ति स्म। प्रकाश प्रदीपाः प्रज्वालिताः भवन्ति स्म। अन्यायसमक्षं सः कदापि नतमस्तकः न जातः।

राजनीति–क्षात्रधर्म–शिक्षण–समाजपरिवर्तनादिविषयेषु तस्य लेखाः प्रकाशिताः आसन्। केसरीसिंहः राजस्थाने सर्वप्रथमः देशभक्तः नवयुगकविरासीत्। सः उत्तमः गद्यलेखकः पत्रलेखकः समीक्षकश्चासीत्। सः कर्मयोगी आसीत्। अस्य कवेः शब्दचित्रं पश्यामः–

सुहडभ्रात, जामात, सुत समिधा हुआ सुचंग।
जग्य हुताशण झोंकिया, रङ्ग केहर घणरङ्ग ।।

(भ्राता, जामाता, पुत्रसहितं सर्वेऽपि बलिदानवेद्याम् आहुताः स्वतन्त्रतायाः हुताशने आहुताः इति केसरीसिंहस्य बहवः वर्णाः सन्ति)

'राजस्थानकेसरी' इति साप्ताहिके सः लेखं लिखति स्म। आदौ

तस्य सञ्चालनं सः एव करोति स्म। अनेन साप्ताहिकेन सः राष्ट्रियचेतनां प्रकटीकृतवान् आसीत्। कारागृहमुक्तेः अनन्तरं सः गान्धिमार्गमनुसृत्य वर्धायाः आश्रमं गतवान्। क्षत्रियाणां पतितदशायाः दुःखं प्रकटीकुर्वन् दोहाकाव्ये कथयति यत्

धर जिण धाशक ध्रूजती, शासक रही निशंक।
वही जात दाशक हुई, अई विधाता अंक।।

(येन धरा कम्पते स्म, येन राज्यं शंकाविहीनं भवति स्म, ते क्षत्रियाः (जातिः) दासाः अभवन्। विधाता कथमाचरति?)

कविद्वारा लिखितानि काव्यानि लेखक–सम्पादक–फतेसिंहमानवेन लिखितकेसरीसिंहबारहठ-ग्रन्थात् साभारं उद्धृतानि अत्र। संस्कृतभाषायाः तस्य प्रभुत्वं दृष्ट्वा कारागृहाध्यक्षः मि.मीकः अभिभूतो भूत्वा तं मुक्तं कारयति इति तु तस्य विद्वत्तायाः एव तेजः वर्तते। महाकवेः अश्वघोषस्य प्रसिद्धा कृतिः 'बुद्धचरितम्' इत्यस्य हिन्दीभाषान्तरमपि तेन कृतम्। पिंगलस्य डिङ्गलस्य च ज्ञानं सः परम्परया प्राप्तवान् आसीत्। तस्य वाणी काव्यस्वरूपे प्रवहति स्म इति श्रोतारः कथयन्ति।

कोटाराज्यद्वारा ई.स. १९०५–०६ तमे वेदानां हिन्दीभाषान्तरस्यायोजनं केसरीसिंहः कृतवान्। किन्तु तस्य विनियोगः न जातः। शाश्वतसत्यवत् कानिचिद् अवतरणानि सः लिखितवान् अस्ति।

२. कारागृहात् लिखितानि कविपत्राणि

केसरीसिंहस्य समक्षम् असत्याभियोगं कृत्वा सः कारागृहं प्रेषितः आसीत्। तस्मिन् समये जामात्रे ईश्वरदानाय, पुत्राय रणजितसिंहाय तथा गवर्नर जनरलमहोदयाय यानि पत्राणि सः लिखितवान् तानि पत्राणि फतेसिंहमानवः 'केसरीसिंह बारहठ' इति स्वग्रन्थे उल्लिखति। ततः तानि पत्राणि भाषान्तरं कृत्वा साभारम् अत्र स्वीक्रियन्ते।

ख्रिष्टाब्द १६-८-१९१७ तमे दिनांके स्वजामात्रे ईश्वरदानाय लिखितं पत्रं वीक्ष्य वज्रहृदयानां हृदयान्यपि दलन्ति। तादृशीं परिस्थितिम् अयं क्रान्तिवीरः सहनम् अकरोत्। त्रयोदशमासं यावत् कारागृहनिवासे एकं पत्रमेव प्राप्यते। तस्मिन् समये मासत्रये एकं पत्रं लेखितुम् अनुमतिः आसीत्। मासत्रये एकवारं कुटुम्बजनैः सह मेलनं शक्यते स्म। क्रान्तिवीरस्य कवेः धैर्यं तादृशं वर्तते यत् एतस्यां परिस्थितौ सन्नपि सः कुटुम्बजनेभ्यः व्याकुलं न भवितुं सूचयति। 'पुरुषार्थमेव कुर्वन्तु' इति वाक्ये स्वतन्त्रतायाः पुरुषार्थस्य कथनं वर्तते। प्रश्नः कालस्य वर्तते। अतः इदानीं स्वतन्त्रताप्राप्त्यर्थम् अधिकः कालः न भविष्यति। भवनं परित्यज्य तस्य कुटुम्बजनाः कुत्र गताः? इति मासत्रयाद् अनन्तरं कविः पृच्छति। सः चिन्तितः आसीत् मातृभूमये न तु गृहाय। सः कारागृहे अन्नत्यागं कृतवान् आसीत् तस्योल्लेखः अत्र कृतः।

कवेः द्वितीयं पत्रं कनिष्ठपुत्राय रणजितसिंहाय वर्तते। पत्रेऽस्मिन् तस्य भ्रातुः उल्लेखं करोति। तस्य पुत्रस्य शिक्षणविषये पृच्छाम् अकरोत्। ख्रिष्टाब्द २०-८-१९१८ तमे दिनांके लिखिते पत्रे सः उल्लिखति यत् कारगृहाध्यक्षस्य मी. मीकमहोदयस्य तं प्रति सहानुभूतिः वर्तते । अत एव कोटाराज्येन यदा अभियोगप्रतिलिपेः ४७ रूप्यकाणि याचितानि तदा

सः अलिखत् यत् अस्य सर्वं गृहीतवन्तः इदानीं सः कुतः धनम् आनयेत्? इति। केसरीसिंहस्य अकिञ्चनपरिस्थितेः अत्र दर्शनं भवति। यदि कोटाराज्यं निःशुल्कं प्रतिलिपिं न ददाति तर्हि ४७ रुप्यकाणि तस्य समीपे न सन्ति। कारागृहाधिकारिमहोदयस्योपरि सः विश्वासं करोति। तस्य पुत्रः प्रतापः कुत्र वर्तते? आंग्लाः तं कुत्र नीतवन्तः? तस्य किमपि ज्ञानं क्रान्तिवीरस्यास्य समीपे नास्ति। स्वस्य कनीयांसं पुत्रं सः उपदिशति यत् 'चरित्रशीलः भवतु, चरित्रं श्रेष्ठं वर्तते'। अत्र ओमकारसिंहस्य यत् उल्लेखो वर्तते, सः तस्य मित्रं तथा समाजसुधारकः आसीत्।

तृतीयं पत्रमपि तस्य जामात्रेऽस्ति। इदं पत्रं गद्ये तथापि भाषासाहित्यदृष्ट्या उत्कटं प्रतिकृतिरूपं वर्तते। आदर्शकथनं तथा ईश्वरश्रद्धा अत्र प्रकटीकृता वर्तते। स्वतन्त्रतायोद्धुः पण्डितजवाहरलालनहेरुमहोदयस्य पित्रा मोतीलालमहोदयेन, पुरुषोत्तमदासटंडनेन मदनमोहनमालवीयमहोदयेन च सह तस्य संबन्धः प्रतिपादितो भवति यतः पत्रे तेषाम् उल्लेखो वर्तते। पत्रे लिखितः ग्रामः 'पाचेटिया' राजस्थानस्य पालीजनपदेऽस्ति। तत्रत्यानाम् आढाचारणानां कवये स्वतन्त्रतासमरे संपूर्णसहयोगः आसीत्। लालालाजपतरायस्य मृत्युप्रसङ्गे समग्रः ग्रामः त्रयोदशदिनानि शोकं कृत्वा मस्तके मुण्डनं कारितवान्। अयं ग्रामः बनासकांठायाः सीमाप्रान्ते वर्तते। अस्य ग्रामस्य व्यवहारः प्रायः गुजरातेन सह आसीत्। रासबिहारीबोझ– सुखदेवादिक्रान्तिवीराः अस्मिन् ग्रामे निवसन्ति स्म। जयेष्ठायाः पुत्र्याः चन्द्रमण्याः अपि उल्लेखं करोति।

कवेः चतुर्थं पत्रं सूचकं वर्तते। वीरप्रतापम् आङ्ग्लाः मारिष्यन्ति इति भाविघटनायाः ज्ञानम् अनेन क्रान्तिवीरेण कारागृहे एव प्राप्तम् आसीत् इति पत्रेणानेन स्पष्टीभवति। कारागृहे कोऽपि पुत्रस्य वार्तां तस्मै न दत्तवान्। अष्टमासात् सः कस्यापि पत्रं न प्राप्तवान् अतः केसरीसिंहस्य हृदये संशयः उत्पन्नः, तथापि तस्य मनोबलं कियत् दृढम् आसीत् इति तस्य वचनैः सिद्ध्यति। अनिष्टवार्ता भवतु किन्तु ईश्वराज्ञां स्वीकृत्य सः

ज्ञातुं तत्परो भवति। सः प्रश्नं करोति, 'अहम् अपघातात् रक्षित एव पत्रलेखने विलम्बं कृतवन्तः वा?' इति तथा एव अभवत्।

पञ्चमं पत्रं सः स्वपुत्रीं विलिखति। तत्र भारते जन्मप्राप्तस्य कर्तव्योल्लेखं करोति। मातृभूमिं प्रति ममत्वभावनायाः स्रोतः तस्य पत्रेषु दरीदृश्यते। गतायां सम्पत्तौ सति सः कुटुम्बस्य चिन्तां न करोति। एतादृशाः क्रान्तिवीराः एतत्सर्वं सोढुं शक्नुवन्ति।

पत्रम् - १

Schedule XLVI From No. 165 Jail Form No. 41 (Old 87) Hazaribagh Cl. Jail.

बन्दीपत्रम्

हजारीबागकेन्द्रीयकारागृहम्,
बिहारराज्यम्, ओरिस्सा
दिनांकः १६-८-१९१८

प्रिय जामातः,

प्रसन्नो भवतु,

इदानीं भवतः एकं पत्रं प्राप्तम्। वास्तविकतया भवतः अनुमानं सत्यम् अस्ति। एतेषु त्रयोदशसु मासेषु अहं कस्यापि पत्रं न प्राप्तवान्। पुनः अहमपि पत्रं लेखितुम् अवसरं न लब्धवान्। अस्तु, गृहस्य दुर्दशायाः ज्ञानम् अभवत्। एतत् सर्वं भाग्यचक्रनियमः, तत्र किम् आश्चर्यम्? सम्पत्तेः वा प्रासादस्य कृते भ्रात्रा किमपि कृतं न स्यात् तथापि व्याकुलः सन् धैर्यं त्यक्तुम् आवश्यकता नास्ति। तस्य किमपि फलं न प्राप्तम्। विश्वासं कुर्वन्तु 'यदस्मदीयं न हि तत्परेषाम्।' शेषमात्रस्य प्रश्नो वर्तते। पुरुषार्थं कुर्वन्तु, सिद्धिदाता तु भगवान् एव।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।

अहमपि तवाग्रहेण एकं पत्रं ए.जी.जी. महोदयाय लिखितवान् अस्मि। भवते न लिखितं यतः कृते रिक्ते हर्म्ये गृहस्य सर्वः जनः शाहपुरायां कुत्र निवसति स्म? सर्वाणि वस्तूनि कुत्र स्थापितानि? एवञ्च पूज्यचरणाः मातृकल्पाः पितृस्वसारः कुत्र सन्ति? ताः कथं सन्ति? भ्राता किशोरसिंहः कुत्र किं च व्यवसायं करोति? भवान् प्रत्यक्षमेलननियमजिज्ञासामपि मयि कारितवान्। सामान्यनियमानुसारं मासत्रये पत्रं प्राप्यते तथा मेलनमपि तृतीयमासे संभाव्यते। बहुशः अक्ष्णोः मेलनं यावत्। मम विषये अधिका व्याकुलता न स्यात्। विशेषतः मम अनशनप्रतिज्ञायाः तथा कारागृहस्य परुषनियमानां च विषये। तथापि धैर्यवन्तः भवन्तु। भगवान् येन केन प्रकारेण मम धर्मस्य रक्षणं करोति। एवञ्च दिवसाः यापिताः भवन्ति।

पवनपान करि अहि जिये, कङ्कर भखि पारेव,
धर्म निबाहन हार है, वह समरथ इक देव।

भवतां समेषां वार्ताः विस्तरेण वर्णयन्तु। स्वधर्ममपि च वीक्ष्य न विकम्पितुमर्हसि'। भगवान् खलु अस्य शरीरस्य अनया रीत्या तपः कारयितुम् वाञ्छन् स्यात्, तदपि बहु अभवत्। नापराधकुर्वताम् अवदशा इयम्। यतः सः (ईश्वरः) स्वयमाज्ञां करोति। न हि कल्याणकृत् कश्चित् दुर्गतिं गच्छति' किमधिकं विशेषेषु।

- केसरीसिंहः

पत्रम् - २

(क्रान्तिवीरस्य कुटुम्बस्य कीदृशी हृदयविदारकावस्थितिः आसीत् तस्य ज्ञानम् एतेन पत्रेण भवति)

Content Admissible under the rules Sd. Jailer

Passed/ may be psoted Sd. Superientendent G.P. Jails P.O. No. 158/11, 600.

हजारीबागराष्ट्रियकारागृहम्,
बिहार–ओरिस्साप्रान्तः,
दिनांक २० अगस्त, १९१८

प्रिय रणजितसिंह !

प्रसन्नो भवतु, भ्राताकिशोरसिंहादयः मया तत्र मिलिताः। आशा वर्तते यत् भवन्तः सुखेन गेहं प्राप्तवन्तः स्युः। तस्य द्वारा प्रतापसिंहस्य वार्ता ज्ञाता स्यात्। अतः लिखतु सः कुत्र कथम् अस्ति? देव्याः चन्द्रमण्याः तथा जामातुः कुशलतायाः पृच्छां करोतु। अतिशयः प्रेमभावः एव सहवासिभिः स्तब्धं करोति। सः एव प्रकृत्याः नियमः। अतः प्रत्यक्षमेलने सति अहं तान् किमपि न पृष्टवान्। भवतः शिक्षणस्य का व्यवस्था कृता इत्यपि ज्ञापयतु। का दिनचर्या? भ्रातरं किशोरसिंहं केन संकेतेन पत्रं लिखामि?

श्रीमतः वाईसरोयमहोदयस्य सेवायां मम निवेदनं कारागृहाध्यक्षमहोदयः स्वीकृतवान् अस्ति। सः कोटाराज्यात् न्याय्यस्य प्रतिलिपिं याचित्वा प्रत्युत्तरे अलिखत् "४७ रूप्यकाणि शुल्कं स्वीकृत्य प्रतिलिपिः दास्यते" इति। तस्योपरि अत्रत्यः न्यायप्रियः कारागृहाधिकारी पुनः राज्यं स्पष्टम् अलिखत् 'सम्पत्यादि-सर्वं गृहीते सति कथं शुल्कं दद्यादिति? पुनश्च कारागृहस्य नियमानुसारं न्याय्यप्रतिलिपिः निःशुल्का दातव्या भवेत्। राज्यस्य उत्तरानन्तरं कार्ययोजनं करिष्यते। तथापि प्रतिलिपिः न प्राप्यते चेदपि अत्रत्याधिकारिणां न्यायस्योपरि तथा दयाभावस्योपरि मम विश्वासो वर्तते यत् वाईसरोयमहोदयस्य समक्षं मम स्थितिं निवेदयितुं ते साहाय्यं करिष्यन्ति। भ्रात्रा ज्ञातं यत् कुंवर सा. ओमकारसिंहाय सर्वकारस्य सी.आई.आई. इत्यस्य उपाधि प्रदत्तः। भवान् मम पक्षतः तस्मै अभिनन्दनं ददातु। संभवो वर्तते यत् सः मां न

अविस्मरिष्यत्। सर्वेषां कुशलतां ज्ञापयतु। तव शीलं पवित्रं संरक्ष। चरितमेव महती शक्तिः। चिरंजीवी भव।

केसरीसिंहः

पत्रम् - ३

हजारीबागराष्ट्रियकारागृहम्
१७ दिसम्बर, १९१८

मम सर्वाशाधार

प्रिय जामाता,

भवतः स्नेहपुरस्सरं पत्रं प्राप्तवान्। विधिनिर्मितावस्थायां यस्य कुटुम्बहृदयं उच्चस्नेहपूर्णं कर्तव्यपरायणं धैर्यादिगुणोपेतं दैदीप्यमानं स्यात् तस्य कुटुम्बस्य भविष्यं कदापि मन्दं न भवति। परीक्षोत्तीर्णकर्तॄणां कृते कष्टं न केवलं भूषणम् अपि तु ईश्वराशीर्वादरूपं भवति। अहं विश्वसिमि यत् मम कुटुम्बं भवादृशैः रत्नैः सुशोभते, तत् अस्यां परीक्षायाम् उत्तीर्णं भविष्यति। दुःखे एव सुखबीजं निहितं वर्तते, सद्गुणानां विकासः जीवनस्य माधुर्यम् अस्ति। एतत्सर्वं तदैव संभाव्यते यदा तत् आकुलं स्वार्थपरायणं च न स्यात्।

भगवतः प्रेरणानुसारं कर्तव्यानुरोधेन श्रीमते वायसरोयमहोदयाय सम्पत्तिविषये तथा दण्डविषये निवदेनद्वयं प्रेषितवान् अस्मि। आशासे मासान्ते तत् प्राप्यते। तस्य प्रतिलिपिं प्रेषयन् अस्मि। मोतीलालनहेरु-पुरुषोत्तमदासटण्डन-मदनमोहन मालवीय-आदिवाक्कीलान् प्रदर्श्य तेषां च मार्गदर्शनं प्राप्य कार्यं करणीयम्। भगवान् सम्यक् एव करिष्यति। रात्र्याः दिवसे, अंधकारस्य प्रकाशे, सुखस्य दुःखे परिवर्तनमिति नैसर्गिकनियमः। तत् अवश्यमस्ति। निमित्तो भव।

मम स्वास्थ्यं मासचतुष्टयात् समीचीनं नासीत्, किन्तु इदानीं

सम्यक् अस्ति। चिन्तायाः कारणं नास्ति। प्रतापस्य वार्तां न प्राप्नोमि अतः चिन्ता प्रभवति।

रणजितस्य पत्राक्षरं दृष्ट्वा भाषायाः अशुद्धिं च वीक्ष्य तस्य शिक्षणोपरि दुःखमुत्पद्यते। किं तम् एतावत् द्रष्टुमपि नास्ति कोऽपि? भ्रातुः किशोरसिंहस्य संकेतम् अवश्यमेव लिखतु। पाञ्चोटियाग्रामस्य भ्रातॄणाम् आधिपत्यं मम स्मृतौ अचलं वर्तते।

देवचन्द्रमणे ! तव पत्रं सदा हृदयस्पर्शं भवति। भवत्याः आश्वासनं मत्कृते स्वर्गरूपं सञ्जायते। भवत्याः स्वास्थ्यविषये विज्ञाय मम हृदयचिन्ता अपगता। गीतायाः अध्ययनम् अवश्यं करोतु। ईश्वरचरणयोः सर्वस्वभावेन समर्पयतु। भवती यत् प्राप्तवती ततः अधिकं कोऽपि पिता स्वपुत्र्यै दातुं न शक्नोति। मम मातृकल्पपितृस्वसुः अनन्तपुत्रवात्सल्यं तथा तपः एवञ्च भवत्याः पञ्चाग्नितपतपस्विन्याः देव्याः भ्रातुः प्रणयः मम सहायका। देवि ! निशङ्का भव। तव पितुः स्नेहचुम्बनं स्वीकुरु।

अधिकं किं वच्मि? मङ्गलकाङ्क्षिणी भव।

– पिञ्जरस्थः केसरीसिंहः

पत्रम् - ४

हजारीबागराष्ट्रियकारागृहम्
१४–७–१९१९

प्रिय जामातः,

एतत् कारणं न ज्ञायते यत् अष्टमासेभ्यः भवतां कुशलतायाः वार्ता न प्राप्ता। अवकाशेऽपि अहं पत्राणि प्रेषितवान्, तथापि एकस्यापि उत्तरमहं न प्राप्तवान्।

अस्मै मौनाय विशेषकारणं स्यादिति मन्ये। अनिष्टसंशयोदयः अत्र स्वाभाविकः यतः अन्ते गच्छती संपत्तिः प्रहारं कृत्वा गच्छति। अयं हृदयविदारकप्रवाहः यादृशो विषमो भवति यत् तस्य चिह्नम् आजीवनं

न गच्छति।

कदाचिद् अयं दैवीनियमो मत्कृते अवसरेऽस्मिन् नोपस्थितः। तस्याघातप्रहारात् मां रक्षितुं भवन्तः मौनं स्थापयन्तः सन्ति वा? कदाचित् एषा शङ्का सत्या स्यात्, कदाचिद् अस्य शेषतपोयज्ञस्य एषः शेषाहुतिविधिः। विधिः अभीष्टः भवतु तथापि नियन्तुः आदेशं श्रोतुं वज्रहृदयेन तत्पर अस्मि। आदेशः भवतु नाम दारुणः, अतः पत्रस्य उत्तरं प्रदातुं विलम्बः मास्तु, यतः प्रकृत्याघातः एतावान् दारुणः न भवति यावती कालवेदनाशंकाछाया।

मम जीवन–नवजीवनरूपा इयम् उषा शान्तिपूर्णा मम एषा एव प्रार्थना। मङ्गलमयीप्रभोः समीपे इदं रक्षाबन्धनं मम अखिलकुटुम्बस्य रक्षणं कुर्यात्। शान्त्याः सुखस्य च नवीनग्रन्थिना पुनरायोजनं कुर्यात्। एत एव मम आर्शीवादाः।

भ्रातुः किशोरस्य संकेताय अहं बहुवारं लिखितवान् किन्तु भवन्तः इतोऽपि न ज्ञापितवन्तः। अनेन कारणेन मम प्रबलायाम् इच्छायां पत्रं लेखितुं न शक्तवान्। एवञ्च तस्य एकं पत्रमप्यहं न लब्धवान्। अतः अवश्यं संकेतं प्रददातु। न्यायदाता मुक्तिप्रदाता भगवान् मङ्गलमयो वर्तते। अधिकं किम्?

केसरीसिंहः

पत्रम्-५

श्रीमति, सौभाग्यवति चि. चन्द्रमणि,

प्रसन्ना भवतु,

भवत्याः पत्रं प्राप्तवान्। पठित्वा आनन्दः जातः। मम विषये चिन्तां न कृत्वा स्वकर्तव्यधर्मस्योपरि मननं करोतु। भारते जन्मना सह किञ्चित् कर्तव्यं मानवजीवने अविभाजितरीत्या प्राप्यते। तत्कर्तव्यपूरणे वा ऋणमुक्ततायामेव अस्माकं कल्याणं वर्तते। मम मत्कृते त्यजतु, अयं

भगवत्परीक्षाकालः जवेन गच्छन् अस्ति। उत्तीर्णतायाः आधारः केवलं ममान्तरिकबलस्योपरि एव वर्तते। एवञ्च तस्मिन् अन्तःकरणे परीक्षकः आदिगुरुः स्वयम् अवस्थितो वर्तते। सत्यजीवनरहस्यं वास्तविकधर्मं ये न जानन्ति ते अस्माकं कुटुम्बस्योपरि आगतां विपत्तिपरम्परां वीक्ष्य नानाविधन्याययुक्तटीकां कुर्वन्ति। तेषां वाक्यान्यपि भवतां कर्णयोः प्राप्तानि स्युः, परन्तु भवतां धैर्यस्योपरि विचारस्योपरि अहं सन्तोषमनुभवामि। एतत् ज्ञात्वा भवन्तः अपि सन्तोषं प्राप्स्यन्ति यत् महत्त्वपूर्णे भारतदेशे जागरणाय प्रारम्भः अस्माकं कुटुम्बाहुतितः अभवत्। अस्मिन् राजसूययज्ञे अस्मदीयानां बलिदानं मङ्गलमयं सञ्जातम्। नाशवतां शरीराणां प्रतीतिः भविष्यति। बहिःस्थितानाम् आत्मीयजनानां कुशलतामिच्छामि। कालोऽयं सावधानस्य। न कस्यापि उपरि विश्वासः करणीयः। अस्माकं मेलनम् अवश्यमेव भविष्यति। भवतां पत्राणि प्राप्तानि भवन्ति। स्वतन्त्रप्रबन्धोऽस्ति। मम प्रियः ईश्वरः जयतु।

भवदीयः वल्लभपिता

केसरीसिंहः

३. कारावासमुक्तेः अनन्तरं लिखितानि पत्राणि

प्रथमपत्रम् आबुपर्वतस्थितमहामहिमराज्यपालं प्रति लिखितमस्ति। अस्मिन् पत्रे क्रान्तिकारिविचारयुक्तेनानेन कविना नवपरिवर्तनम् अनिवार्यमस्ति इति विलिख्य राज्यपालं (गवर्नर) प्रति स्वध्वनिं प्रेषयितुं कार्यं कृतम्। राज्ञां शासनपद्धतौ परिवर्तनम् आनेतुं प्रजाः केन्द्रे संस्थाप्य सुशासनाय निवेदितमस्ति। दमनस्य स्वेच्छाचारस्य च विरोधः कृतः। वर्तमानपरिस्थितिः लोकहिते नास्ति इत्यपि निवेदितम् अस्ति। राज्यनाम् आर्थिकनीतिः विकटा एवं विकृतमार्गे प्रवर्तिता इत्यपि प्रतिपादितम्। सर्वत्र अविश्वासस्य, स्वार्थस्य, हिंसायाश्च साम्राज्यं प्रवर्तते इत्यपि निवेदितम्।

पत्रं बहु वदति। स्वतन्त्रतायाः पूर्वं एवं विप्रतिपत्तियुक्तकथनाय न कोऽपि प्रवर्तते स्म। किन्तु समयेऽस्मिन् क्रान्तिज्वालाः प्रज्वलिताः आसन् तथा स्वतन्त्रतामन्त्रः गीतामन्त्र इव सञ्जातः।

इदं पत्रं आबुपर्वतस्थितमहामहिमराज्यपालस्य (गर्वनर) कार्यसञ्चालकाय कारावासमुक्त्याः अनन्तरं लिखितमस्ति।

पत्रम्-१

राज्यपालस्य कार्यसञ्चालकाय पत्रम्।

(ई.स. १९२०)

मान्यवर !

राजपूतानायाः बाह्याभ्यन्तरसार्वजनिकस्थितिं अवलोक्य मयि दृढविश्वासः उत्पन्नः यत् प्रत्येकं देशीराज्ये तेषां प्रचलितशासनपद्धतौ सममयानुकूलम् उचितं संशोधनमावश्यकम् इति। न केवलमेतत्, अपि

तु समयावसरलाभः न गृह्यते चेत् अग्रे गत्वा एतत् सर्वं भूतकालगतमेव भविष्यति। अत एव तेषां ये हितेच्छवः सन्ति तैः स्पष्टीकर्तव्यं यत् प्रजाराज्यशासनयोः नित्यप्रत्यक्षसम्बन्धः वरिवर्ति।

सा प्रजा इदानीं शासनविमुखा भवितुं नेच्छति। तासां भावोऽयं वर्तमानः जवेनाग्रे नोदति।

प्रजासुखशान्तिमतानामहेलनां कृत्वा कृत्वा केवलं मौखिकसहानुभूतिदमननीतिसफलताबलेन अधिकस्वेच्छाचारजीवितेच्छायाः चेष्टा तु दुःखप्रदा कल्पनैव। एतादृशाः विषया आन्तरिककलहेभ्यः आमन्त्रणं प्रददति।

स्वदोषाङ्गीकारकरणमिति उत्कोटिकं नैतिकं बलं वर्तते। अतः सत्यार्थमवगन्तव्यं यत् एकमपि राज्यं तादृशं नास्ति यस्य वर्तमानशासनपद्धतौ पूर्णनियमबद्धता, पूर्णस्थिरता लोकहितं वा स्यात्। प्रजा धनस्थापनाय यन्त्रम् अस्ति एवं शासनं धनस्वीकरणाय यन्त्रम् अस्ति। राज्यभण्डारस्य आयः उत्तरोत्तरम् अधिकं स्यादिति शासनस्य एकः मूलमन्त्रोऽस्ति। न्यायसुखशान्तिसुगन्धेषु अवसरोऽपि तस्य मूलयन्त्रस्य पोषकाङ्गं भवति। अतः तत्तस्य वास्तविकोपयोगितायां वृथाऽस्ति। राज्यानाम् आर्थिकनीतिः तथा स्थितिः विकटा तथा विकृतमार्गोपरि वर्तते। नरेशस्य अनिच्छयाऽपि प्रजापीडनम् अवश्यमेव भवति एकपक्षीयशासनात्।

एषा शैली न नूतना किन्तु ज्ञानं नूतनम् इति वक्तव्यं योग्यं स्यात्। राज्यानाम् आन्तरिकव्यवस्थानिरीक्षणे स्वोत्तरदायित्त्वं यावत् राज्यसर्वकारेण स्वीकृतमासीत् तावत् अस्य शासनस्योपरि एकप्रकारकं बलिष्ठं नियन्त्रणम् आसीत्। तेन सह न्याय्यस्य तथा शान्त्याः समर्थनं कुर्वतः स्वहितभिन्नोत्तमसर्वकारस्य शासनमासीत्।

एवम् अनया शासनपद्धत्या दुष्टेभ्यः प्रजायाः सम्यक् रक्षणम् अभवत्। एवं कृते तस्य वास्तविकी भयङ्करता प्रजायाः समक्षं न समागता।

किन्तु स्वनीतिवशगतसर्वकारः यदा हस्तक्षेपम् उज्झितवान्, तथा जवनिका अपगता तदा ज्ञानम् अभवत् यत् वस्तुतः प्रजाः स्वप्रियराजसिंहासनात् दूरीगताः सन्ति। द्वयोः कार्यं भिन्नभिन्नदिशि जातमस्ति।

इयं शासनपद्धतिः न पुरातनी जाता न वा नूतना, न एकाधिपत्यसत्ता जाता न वा पूर्णा सरमुखत्यारशाही, न सर्वत्र अनियमिता जाता न वा नियमबद्धता। पुञ्जीपतयः राज्यं भक्ष्यमिति मत्वा मनसि आनन्दिताः सन्ति। सामान्या प्रजा पुञ्जीपतिराष्ट्राभ्यां स्वरक्तप्रवहनानुभवं प्रत्यक्षम् अनुभूय स्वयं स्वतन्त्ररीत्या आत्मरक्षणाय प्रयत्नरताऽस्ति। सा नास्ति सनातना राष्ट्रभक्तिः। नास्ति विश्वासः। सर्वत्र अविश्वासस्य, स्वार्थस्य, हिंसावृत्त्याः च साम्राज्यं वरिवर्ति। उपरिष्टात् एव जनाः शान्त्याः दृश्यं दर्शयितुं चेष्टां कुर्वन्ति। ते स्वयं सन्देहे सन्ति। वस्त्रेणाग्निच्छादनस्य भ्रमः, कपटं, क्रीडा चेतत्। ममात्मा साक्षीं पूरयति अस्य। यदि ईश्वरः एतत् असत्यं सिद्धं कुर्यात् तर्हि अहं परं सुखी भविष्यामि। किन्तु इदानीम् अनुभवेन ज्ञायते यत् इयं देशीराज्यप्रजा, अशिक्षितप्रजा, केवलं पशुबलज्ञाता प्रजा, निर्दयतया पीडिता द्ररिद्रा प्रजा, साहाय्यहीना प्रजा, शनैः शनैः स्वसञ्चयालापं कुर्वती अस्ति। यदि कोऽपि उत्कर्षनाम्ना तासां पुरतः क्रान्तियोजनां संस्थाप्य तस्योपरि पादं स्थापयितुं सिद्धो भवति, तस्य लेशमात्रं ज्ञानं नास्ति। सा ज्ञातुं न शक्नोति यत् योजनायाः अधः कस्मिन् स्थाने एतादृशो भयानको गर्तो वर्तते। योजना तु विपरीता, यत् सहस्रहस्ताः तां अधोऽधः नेष्यन्ति। यदि शासनमेव अनियन्त्रितं स्यात्तर्हि कथं नियमानुगुणं कार्यं कर्तुं प्रजाभावः प्रभवेत्? अस्यां दशायां वृथापीडितप्रजायां स्वेच्छाचारभावः जागरितः स्यात्, नास्ति तत्र आश्चर्यम्। तेन सह विकटपरिस्थित्याः लाभं ग्रहीतुम् अनुभवरहितप्रजया सह नाटकं कर्तुम् अनेकानुत्तरदायित्वधारिणः जनाः प्रलोभिताः भविष्यन्ति, नास्ति तत्राप्याश्चर्यम्। एतेषां सर्वेषां परिणामः किं भविष्यति? बुद्धौ नागच्छति यत् यत्र अशान्तिः अविश्वासः, अव्यवस्था चाच्छादितज्वालामुखमिव नादं

कुर्वन्ति, तस्मिन् राज्ये एकः राजा तथा मुष्ठिगण्याः प्राप्तवेतनाः परामर्शदातारः सन्ति, तेषामुपरि सर्वकारः मित्रताभारं संस्थाप्य कथं निश्चिन्तः स्यात्?

मम प्रत्यक्षानुभवानुसारं देशस्य वास्तविकीं परिस्थितिं संक्षेपेण लिखितवान् अस्मि इति मे विश्वासः। इदं भवद्भिः अविदितं न स्यात् यतः भवन्तः अस्य प्रान्तस्य सर्वोच्चाधिकारिणः सन्ति। अहं पश्यामि यत् अस्य रोगस्योपशामनाय इदानीमपि प्रारम्भः न जातः। वस्तुतः तमेव उपायं मन्येऽहम्, यत्र राज्ञां प्रतिष्ठा तथा सत्ता भवेत्। पुञ्जीपतयः अपि अवगच्छेयुः यत् उपरिष्ठात् राजा तथा अधःस्तात् प्रजा इति चक्रद्वयमध्यस्थितेऽपि तेषाम् अस्तित्वस्य अधिकारस्य च नाशः न स्यात्। प्रजा निश्चिन्ता भवेत् तथा तस्याः सुखं शान्तिश्च स्यात्, समेषां कृते न्यायद्वारम् उद्घाटितं स्यात्। मनुष्यमात्रस्य कृते अधिकारः आवश्यकः अस्ति, तत् भवद्भ्यः न कोऽपि स्वीकरिष्यति। अस्माभिः सह पशुः इव व्यवहारः न स्यात्। वयं अस्माकम् आयस्य तथा राज्ये प्रदत्तसम्पत्याः उपयोगं सम्यक् कर्तुं प्रभवाम।

सर्वकारस्य विश्वासः स्यात् यत् राज्येषु केवलं न राजा, अपि तु प्रजाऽपि मित्रतायाः सन्माननं करोति एवञ्च सद्हृदयेन राजभक्ताऽस्ति। अस्योपायस्य मुख्यौषधिः वर्तते 'सहयोगः'। राजा–पुञ्जीपति–प्रजानां परस्परं प्रेमविश्वासयुक्तः व्यवहारः, प्रत्यक्षसहयोगसम्बन्धः, समाविष्टराज्यसर्वकारेण सह सहयोगपूर्वकं मैत्रीपालनञ्च पर्याप्तम्।

परन्तु एतत्तदैव संभवति यदा प्रजासहयोगावश्यकतां राजा तथा सर्वकारः स्वीकुर्यात्। स्वीकारस्यार्थो भवति स्थायिनीतिघोषणाद्वारा शासने उचितपरिवर्तनम्। परिवर्तने प्रजाप्रतिनिधिनां स्थानं स्यात्। शासनद्वारा राज्ञाम् अनुचितमनस्वितानियन्त्रणं भवेत्।

राज्यानां सत्याय दृढहिताय च सर्वकारव्यावहारिकपुष्टये प्रजाप्रज्वलितवह्निशमनाय उपरोक्ता स्वीकृतिः न केवला उचिता, अपि तु

परमावश्यकी इति तर्कयामि।

माननीयाः! अहं भवद्भ्यः विश्वासम् अर्पयामि यत् राजपूतानायाः राजा तथा प्रजा इत्यनयोः परस्परं विश्वासप्रेमसुखशान्तयः द्रष्टुं कस्मादपि न्यूनोत्सुकः नास्मि। अतः प्रत्येकं देशभक्ताय राज्यभक्ताय उपरोक्तपवित्रध्येयं यथाशीघ्रं कार्यान्वितं स्यादिति मत्प्रधानं कर्तव्यं मन्ये। आशासे यत् अस्मिन् शुभकार्ये अनेके योग्याः जनाः स्वस्य पूर्णशक्तिं योजयितुं सिद्धाः भविष्यन्ति। स्वाधीनकल्पनायाम् अनुभवरहिता प्रजा मार्गच्युता न भविष्यति। राज्यमूलमपि दृढतरं भविष्यति।

मम उपरोक्तानुभवेन तथा विश्वासेन सह यदा भवन्तः महानुभावाः सहमताः स्युः तदा भवतां सहानुभूतिं ज्ञात्वाऽहं ज्ञापयामि कथमस्य कार्यस्य प्रारम्भः उचितः स्यादिति। केवलं दिग्दर्शनाय इयं योजना प्रेषिताऽस्ति। तस्याः उपरि विशेषनिवेदनं तदैव कर्तुं प्रभवामि यदा भवतामनुमोदनं लभेत एवञ्च राजानः अस्मिन् विषये ध्यानं दातुं सिद्धाः भवेयुः।

ईश्वरं सम्प्रार्थयामि यत् तेभ्यः सर्वेभ्यः सद्बुद्धिं दद्यात्। अहं मम कर्तव्यमकरवम्। अतः भवन्तः मद्विचारान् तुच्छोपेक्षाभावेन पश्यन्ति चेदपि दुःखं नानुभविष्यामि। मद्विचाराः मदीयभाषायामभिव्यक्ताः भवेयुरित्युचितमनुभूतं मन्यते मया। प्रागपि आङ्ग्लज्ञानाभावेन यदा यदा मद्विचाराः आङ्ग्लभाषायामनुवादं कारयित्वा प्रेषिताः तदा तदा मया अनुभूतं यत् मद्विचाराः भवतां समक्षं योग्यरीत्या न प्रस्थापिताः। एतादृशौ स्थितौ त्रुटिस्तु स्वाभाविकी। अतः मम हिन्दीलेखनसाहसं क्षम्यताम्।

अत्र एकमन्यदपि निवेदयामि। अहं नेतृत्वभूतात् बहु दूरमेव भवामि। यतः मयि ते गुणाः न सन्ति। यावत् नेता भवितुं सरलं जातं तावत् कम्पितो भवाम्यहम्। या प्रार्थना मया कृता, तस्यार्थः कदापि एवं न भवति यत् अहम् अग्रेसरो भवितुमिच्छामि। भवतामन्तःकरणे मया यत्किमपि दृष्टं तत्सर्वं निर्भयतया निःस्वार्थतया चोक्तम्।

यदि भवन्तः स्वयमेव इदं कार्यं हस्ते स्वीकरिष्यन्ति अथवा कोऽपि अन्यः जनः स्वीकरिष्यति, तदाऽहं प्रसन्नो भविष्यामि। अहम् अपेक्षां त्यक्त्वा स्वशक्तिं तथा सेवां समर्पयिष्यामि। नाहं ख्यातिं काङ्क्षे। एकमेव लक्ष्यं वर्तते यत् सर्वकारस्य तथा राज्ञां सहानुभूत्या दरिद्रप्रजायाः सेवां कर्तुं शक्नोमि। राजागणः वृथा मम नाम्नः आश्चर्यमनुभवति। अनेन कारणेन मद्विचाराः तेषां पुरतः न प्रस्थाप्य भवतां पुरतः स्थापिताः। भवतामुपरि एव एतेषां राज्यानां हितमहितं च निहितं वर्तते। अधिकलेखनेन किम्।

सूत्ररूपमयी योजना राजस्थानमहासभायाः

(१) भूस्वामि–प्रतिनिधिमण्डलम्	(२) सार्वजनिकप्रतिनिधिपरिषद्
सामन्ताः	श्रमिकाः
भूस्वामिनः	कृषिवलाः
क्षमावन्तः	वणिजः

✻ उद्देश्यानि

(१) राजाप्रजासु परस्परं सहयोगः करणीयः, प्रेमशान्तिस्थापना तथा रक्षा करणीया।

(२) राजस्थानेषु अर्थात् भारतस्थदेशीराज्येषु प्रजाभिमुखशासन पद्धतिस्थापना करणीया।

(३) राज्ञां भूस्वामिनां तथा सर्वसामान्यजनेषु न्यायप्राप्तिः तथा प्राप्ताधिकाराः स्युः तथा तेषां रक्षणं स्यात्। अर्थात् स्र्वकारः हिन्दसन्दर्भे राज्ञाम्, राजासन्दर्भे भूस्वामिनां प्रजानां च, भूस्वामिनां सन्दर्भे सामान्यजनानाम् अधिकाराणां संरक्षायै धर्म–सत्य–न्यायानामाधारितसर्वप्रकारकान् विविधान् उपायान् कुर्यात्। निर्बलाय साहाय्यं कृत्वा राज्यस्य प्रत्येकम् अङ्गेषु

शान्तिसुखे स्थापनीये।

(४) राज्येषु धार्मिक–सामाजिक–नैतिक–आर्थिक–मानसिक–शारीरिक-लोकहितकरशक्तीनां विकासाय सर्वाङ्गीणमायोजनं करणीयम्।

पत्रम्–२

(कवेः द्वितीयायै पुत्र्यै सौभाग्यमणये तथा जामात्रे ईश्वरसिंहाय तयोः लग्नप्रसङ्गे लिखितं पत्रम्।)

मम पुत्रि सौभाग्यमणि !

एवं ज्ञातुं न शक्यते दाता मह्यं पुत्रीरूपेण अमूल्यं धनम् अयच्छत्। यस्य साम्यं वर्तमानचारणसमाजे केनापि सह न भवति।

पुत्रि, मम शक्तिः कियती? एतत्तु दीनबन्धोः जगतः नियन्तुः अनुकम्पा। यः तव मातृगर्भे एतादृशसंयोगललाटपङ्क्तिमकरोत्। सः एव सत्यदाता। वयं तस्य चरणौ प्रणमामः।

नूतने संसारे पादस्थापनेन सह शब्दद्वयं वक्तुं मम धर्मो वर्तते। पतिपत्न्योः सुन्दरः सुखमयः व्यवहारः त्वया पित्रोः जीवने दृष्टः। तस्य स्मरणेन तव जीवनं सुखमयं भविष्यति।

तव हृदयं तथा शरीरं प्रतिक्षणं पतिसेवारते भवतः। दृष्टिः तं प्रति स्यात्। द्वयोः अद्वैतं भव। पतिहृदयानुरूपं तव हृदयं भव तत्रैव तव भद्रम्। तस्यै सः एव धर्म-तप-कर्मादिसर्वम्। विना कथनेन तस्य इच्छा कर्मरूपा स्यात्, तदा सः दिवसः सुखमयो भविष्यति। तत्तदैव भवितुमर्हति यदा त्वं तस्य हृदयं पूर्णं ज्ञास्यसि। यदा तस्मै स्वार्पणा भविष्यसि तदा तस्य हृदयद्वाराणि उद्घाटितानि भविष्यन्ति।

सः भवत्याः यावतीमपि प्रतिष्ठां कुर्यात् तथापि त्वया तस्य सेविका मन्तव्या। पुण्यपथि सः दृढः स्थापनीयः। पापात् रक्षणीयः, तस्य कीर्तिः उज्ज्वला कर्तव्या। सः एव तव धर्मः।

तव सुखभोगवृत्तिः तस्योपरि भाररूपा न स्यात्, तस्मात् सावधा नैर्भाव्यम्। नूतनवस्त्रधारणं कृत्वा पतिः प्रणितव्यः गुरुजनान् प्रत्यपि

तथैव वर्तितव्यम्। नम्रता-सेवा-सदाचारैः अनुकूलाचरणेन सत्यपथगमनेन सर्वेषां वात्सल्यं प्राप्स्यसि।

मुखे सदा तालकं स्थापनीयम्। जिह्वा वशीभूता स्यात्। जिह्वास्वादलोभः तथा जल्पनं कलहरूपेण भूत्वा विनाशम् आमन्त्रेते। पतिविनोदे मुखम् उद्घाटनीयं किन्तु कस्यापि निन्दायां न। सत्ये सति सहिष्णुता मितभाषिता च स्थापनीया। तेन शान्तिः भविष्यति। उदाराः स्त्रियः अन्यान् सम्यक् भोजयित्वा प्रसन्नाः भवन्ति। यस्याः गृहिण्याः गृहात् कोऽपि बुभुक्षितः पिपासितः न गच्छति तस्यै गृहिण्यै धन्यवादः।

कर्णौ अपि नियन्त्रितौ स्थापनीयौ। वार्तालापं श्रोतुं धावनं न कर्तव्यम्। प्रपञ्चे न पतनीयम्। हस्तौ पादौ च कार्ये संयोज्य मुखे कर्णयोः च संयमः करणीयः, तेन जीवनं सुखमयं भविष्यति।

प्रिये वत्से, तव जन्मदातारं पितरं विस्मर। इदानीं पतिदेवस्य आप्तजनाः एव भवत्यै पूज्याः सन्ति। एकस्य वा दिनद्वयस्य न, अपि तु इदम् आजीवनव्रतम्।

गृहसेवां तु सर्वे कुर्वन्ति किन्तु ग्रामे कुटुम्बे प्रतिवेशिजने सेवाभावना कर्तव्या तत्र जातिवादः च न दृष्टव्यः।

तव सहोदरस्य प्रतापस्य स्मरणेन बलं प्राप्स्यसि त्वम्। तव सेवया पितुः प्रतिष्ठामपि उज्ज्वलां कुरु। मातुः आदर्शं समक्षमेव स्थापय। किमपि ज्ञातुं कष्टं भवति चेद् पतिदेवं प्रष्टव्यम्।

संवत् १९८५ जेठवदी १३ तव वल्लभपिता,

केसरीसिंहः

पत्रम् - ३

निर्धन वा निधिरूप, मम प्रिय जामातः,

केचन वार्तालापाः विश्वविद्यालयस्य उपाधौ वा पाठ्यपुस्तके न भवन्ति। मम दीर्घानुभवस्य फलमिदम्।

पिता पुत्र्याः करदानम् अवश्यमेव सेवायै कस्मैश्चित् ददाति। किन्तु सेवादासत्वयोः भेदः। एकं सात्त्विकम् अपरं तु तामसिकम्। एकम् आसुरी अपरं तु दैवी।

अर्धाङ्गिनी पतिप्राणानाम् अधिष्ठात्री अस्ति। सेविकया सह सा तु सद्मित्रमपि। तस्य प्रतिष्ठायां प्रसन्नतायां च भाविबालकानां भविष्यं निहितमस्ति।

अहं सौभाग्यमणेः मातरं कदापि 'त्वं' इति न आहूतवान्। यच्छिरः पादौ च प्रणमन्ते, तस्मै जनाय आलिङ्गनं दातुमेव महत्त्वं विद्यते। तस्योपरि पादः न स्थापनीयः। यत्र नार्यः पूज्यन्ते तत्र देवाः प्रसन्नाः भवन्ति।

भवतोः अद्वैतं भवितुं कालो गमिष्यति, कदाचिद् आकृष्यमाणमपि भविष्यति, किन्तु प्रत्येकं मूले एकतायाः दिव्या भावना आवश्यकी, अत एव शान्त्या धैर्येण, क्षमया च कार्यं साधनीयम्। प्रेम विजयस्य कुञ्चिका किन्तु तस्योपरि अपि नियन्त्रणं करणीयम्। कदाचिद् परिवारेण पत्नीहृदयं भग्नं भवेद्, तदा पतिमुपगम्य शान्तिमवाप्य सा प्रफुल्ला भवति। नार्याः सद्गुरुः पतिरेव, इदं कार्यं भवता करणीयम्।

प्रारम्भे अतिप्रणयः व्यवहारे मर्यादारूपो भवति अतः 'अति' वर्जयेत्।

परमात्मानं विहाय नास्ति कोऽपि निर्दोषः, अतः मित्रदोषः क्षमापूर्णेनालिङ्गेन दूरीभवति। अक्ष्णोः उदासीनता प्रेमिजनाय असह्यः दण्डः अस्ति। नारी स्वानुकूलं यथा स्यादिति तथा कर्तुं पतिरेव समर्थः। आर्यसंस्कृतिपाश्चात्यसंस्कृत्योः भेदो वर्तते। पाश्चात्यसंस्कृतौ जनानुकूलं

जनान्वेषणं क्रियते, अत्र तु तथा जननिर्माणं क्रियते।

जामाता पुत्रसमो वर्तते। मम पुत्रीं भवत्कराभ्यां संप्रदाय अहं निश्चिन्तोऽस्मि।

भवतः युगलमूर्तेः मङ्गलाकाङ्क्षी
केसरीसिंहः

पत्रम् – ४

(तेषामधस्तनपत्रे तत्सदृशाः रूढक्रान्तिकारिणः परन्तु अन्ते अहिंसाभावेन कया रीत्या आत्मपरिवर्तनं प्रति गतिशीलाः भवन्ति ते भावाः विचाराः प्रकटीभवन्ति)

प्रातः रामनारायण चौधरी

सप्रेम्णा वन्दे।

प्रियवर!

भवतां पत्रं प्राप्तम्। ज्ञातं सर्वम्। अहमहिंसां मानवधर्मस्य सर्वोपरिभूतमङ्गम्मन्ये। यतो हि हिंसा पशुतुल्यं कृत्यमस्ति। आतंककारणेन कदाचित् अबलाशक्तेः रक्षार्थं प्रहारोऽनिवार्यो भवेत्, तथापि हिंसकस्य हस्तं भङ्क्त्वा सद्य एव तस्य सेनायां मम प्रियभ्रातेव तं सेवितुं शक्नोमि, अत्र वक्तुं न शक्नोमि यत् ममेयमहिंसा बापूमहोदयस्याहिंसायाः मर्यादायामागच्छति तेनेति।

यत्र सम्यक्ज्ञातं तत्र हृदिस्थायाः द्वेषवृत्तेरभावोऽभवत्। अस्मिन् विषयेऽहं मदीयां परीक्षामेतादृशे समये गृहीतवान् यदा भारते बापूमहोदयानामहिंसा सत्याग्रहश्च पूर्णतया विकसितौ नास्ताम्। अर्थात् इतः पञ्चविंशतिषड्विंशतिवर्षेभ्यः प्राक् हजारीबागस्य कारागाराध्यक्षः सामान्यचिकित्सकः डॉ. जोर्डनः स्वेच्छयाऽस्मिन् देहे अत्याचारःकृतवान् तदानीम् आंग्लीयनीतिं प्रति तान् जनान् प्रति मम हृदये द्वेषभावो नोद्भवत्। सङ्कल्पदृढताऽपि अद्यतनसत्याग्रहस्येव स्वाभाविकी आसीत्।

अहं हिंसां हृदयपरिवर्तनं कारयितुं सफलोऽभवम्। अद्याप्यहं स

एवं, एतदात्मश्लाघार्थं न लिखितवान्। केवलं ज्ञानार्थमेव लिखितवान्। यत् तदानीमपि रूढक्रान्तिकारिण: जीवने आर्यधर्मस्य दीपो न निर्वात:। अस्तु अधुनाऽहं क्रान्तिवादं हृदयेन अव्यावहारिकं मन्ये अपि चाहिंसाया: निर्मलमार्गमेव श्रेयस्करमेवावगच्छामि। एतावती विचारमुक्ति: एतदर्थं क्रियते, यत् तदानीन्तन: रूढक्रान्तिकारी केसरीसिंह: इदानीन्तन: केसरीसिंह: भिन्नोऽस्ति इति बोद्धुं बापूहृदये भ्रमो न स्यात्।

हिन्दुमुस्लिमयो: ऐक्यं हृदयेनेच्छामि, एतावदेव न, अपितु तं परमावश्यकं मत्वा सततं क्रियया प्रयते। अपि च प्रत्येकं मानवा: जातिं धर्ममाश्रित्य भिन्ना: न सन्ति, कोऽपि अस्पृशोऽपि नास्ति।

उपर्युक्तत्रिविषयेषु अहमात्मानमधिकारिणम्मन्ये परन्तु चतुर्थे विषये नियमितचक्रसूत्रवयनात्मके कार्ये आत्मानं पृष्ठे एव पश्यामि, तथापि चक्रसूत्रवयनस्योपयोगिताम् अन्त:करणेन स्वीकरोमि, तस्य कारणं तदेव, यत् मम गृहं वध्व: पुत्र्यश्च नित्यं सूत्रचक्रं चालयन्ति तथापि तस्मिन् अहं स्वयं नियमबद्ध: भवितुमसमर्थोऽस्मि। मम हस्तगुल्फयो: स्नायुषु चतुर्पञ्चवर्षेभ्य: महती पीडा भवति, चिकित्सकानां ओषधिसूचिकाभिरपि सा पीडा न न्यवर्तत। साऽपि वृद्धत्वकाले समागता, अत: अन्तपर्यन्तं निवत्स्यति अस्या: पीडाया: कारणेन मम लेखनप्रवृत्ति: कुण्ठिताऽभवत्। दशपञ्चदशक्षणलेखनानन्तरं पीडामनुभवामि अनेन कारणेन चक्रसूत्रस्य भ्रामणं स्नायूनामाकुञ्चनञ्च भवितुं नार्हति। ममेयं विवशता।

अस्य देहस्य विषये यदि बापूमहोदयेन ज्ञातव्यं स्यात् तर्हि काश्या: सुप्रसिद्धं बाबू-भगवानदासमहोदयं प्रयागस्य पुरुषोत्तमदास-टण्डनमहोदयं प्रष्टुं शक्नुवन्ति अहं भवते अधिकं न लिखामि यदि उपरितनत्रुटिकारणेन पूज्यबापूमहोदयस्याश्रयं, स्वीकर्तुं यदि न शक्नुयाम्, तर्हि तेषां दशनियमेषु बाधको भवन्नपि आत्मानं तेषां समक्षं प्रस्तोतुं धृष्टतां कर्तुं नेच्छामि, विशेषाग्रहोऽपि नैतिकापराधोऽस्ति?

यदि उपरितनं स्पष्टीकरणं भवते योग्यं प्रतीयेत। तर्हि निवेदनं

कुर्वन्तु, तथापि यदि मौनमेवोचितं प्रतीयेत तदपि मम सम्मतिः। स्वामी, आत्मानन्दः अपि स्वस्थितिकारणेन नियमितसूत्रचक्रवयनेऽसमर्थो अस्ति, परन्तु अन्येषु विषयेषु प्रतिज्ञाबद्धोऽस्मि ।।

भवदीयः

ठाकुरः केसरीसिंहः

पत्रम् – ५

(श्रीविठ्ठलपटेलः ई.स. १९२० तमे काले अखिलभारतीयकोंग्रेसस्य महामन्त्री पदे आसीत् तं सम्बोध्य ता. १६–११–१९२० तमे दिवसे श्रीकेसरीसिंहेन यत् पत्रं लिखितं तदत्र साभारं समृद्धृत्य संस्कृतभाषायां भाषान्तरं विधायात्र प्रस्तुतमस्ति।

स्वतन्त्रतायाः आन्दोलने केसरीसिंहस्य गम्भीरविचारणायाः ज्ञानं तत्पत्रैही भवति। भारतीयराज्याणां सामान्यप्रजा अपि अस्मिनान्दोलने सम्मिलिता स्यावत्, तादृकविचाराणामभिव्यक्तिः तेषां पत्रे दृश्यते।

प्रति,

श्री विठ्ठलभाई पटेल

मन्त्री–अखिलभारतीयकोंग्रेससमितिः, बोम्बे।

प्रिय महोदय ।

"कलकत्ता स्पेश्यलकांग्रेस" तः प्रत्यावर्त्य अर्शरोगेण अतीव व्यथितोऽभवम्, साम्प्रतं मम स्थितिः एतादृशी नास्ति, यत् मम सम्पूर्णविचारान् विस्तरेण भवतां समक्षं स्थापितुं शक्नुयाम्। तथापि विषयस्य गम्भीरता आवश्यकता च मां विवशीकरोति। अहं मम विचाराणाम् अत्यावश्यकः भागः संक्षेपेण भवतां समक्षम् उपस्थापयामि।

१. कोंग्रेसपक्षस्योपसमितेः भवन्तः सर्वे नेतारः भारतीयराज्यानां प्रजार्थं कोंग्रेसपक्षे स्थानं निश्चित्य अखिलभारतीयतां संघटनात्मकभावनां सार्थकीमकुर्वन्। तदर्थं क्षत्रियसमूहस्य मध्यमभारतीयजनानाञ्च पक्षतः भवते धन्यवादं प्रस्तौमि।

२. अस्य कार्यस्य महतीम् आवश्यकतां यदा पश्यामः तदानुभूयते यदेतत् कार्यं प्रथममेव विधेयमासीत्। अतिविलम्बोऽभवत्, अस्तु! अतीतः कालः पुनः नागच्छति, परन्तु अस्माकं विश्वास आसीत् यत् विलम्बेनागतं अवश्यमेव शोभनं भविष्यति परन्तु दुःखमेतद्यत्तथा नाभवत्।

३. उपसमितिद्वारा देशस्य प्रान्तरचना या अभवत्। तत्र दिल्ली-अजमेरयोरेकमेव प्रान्तं विरच्य सर्वकारस्यानुकरणं किमर्थं कृतम्? अतः मम विचारानुसारेण–

(क) राजपूताना मध्यभारतञ्च सम्मेल्य अजमेराख्यस्यैकं स्वतन्त्रं प्रदेशं निर्मीयात् यस्य नामकरणं 'राजस्थान' इति विहितं स्यात्।

(ख) अपि च दिल्लीमहानगरं पंजाबप्रदेशे मेलनीयं भवेत् इति।

४. कोंग्रेससमिति द्वारा या प्रान्तरचना कृता तत्र देशीयराज्यानां समावेशः कृतोऽस्ति। तेभ्योऽपि प्रतिलक्षं स्वप्रतिनिधिं प्रेषितुमधिकारं दद्यात्। परन्तु ते यद्यत्प्रान्तेभ्यः यावन्तो यावन्तः प्रतिनिधियः अखिलभारतीयकांग्रेससमितौ ग्रहीतुं निश्चिताः कृताः सन्ति, तेन ज्ञायते यत् देशीराज्यानि विस्मृतानि सन्ति। पूर्वशासने यथाऽभवत्, तथैवेदानीमपि अजमेरदिल्लीमहानगरयोः त्रीन् त्रीन् प्रतिनिधिन् अखिलभारतीयकांग्रेससमितौ प्रेषितुमधिकारो भवेत्, परन्तु राजपूतानायाः मध्यभारतस्य निखिलदेशीयराज्यानां जनसमूहम् अजमेरे समाविष्टवान्।

(क) अत्रैतदावश्यकमस्ति यत् प्रत्येकं देशीयराज्यपक्षतः अल्पात्यल्पः एकः प्रतिनिधिः अखिलभारतीयभारतीयकोंग्रेससमितौ समागच्छेत्, यावदित्थं न स्यात् तावत् अल्पात्यल्पाः पञ्चाशत् प्रतिनिधयः सम्पूर्णदेशीयराज्यपक्षतः अखिलभारतीय-कोंग्रेससमितौ भवेयुः।

(ख) अनया रीत्या राजपूतानायाः मध्यभारतस्य च देशीयराज्यपक्षतः एकैकप्रतिनिधिसमावेशनस्य सुव्यवस्था न स्यात् तावत्कालपर्यन्तं उपर्युक्तक्षेत्रस्य 'राजपूताना महाभारतसभा' अपि च मनोनीताः पञ्चदशप्रतिनिधयः कांग्रेससमितौ स्वीक्रियेरन् ।

५. संक्षेपेण कोंग्रेसोपसमितेरभिप्राये, इदानीं परिवर्तनार्थं देशीराज्यानां विषये मम विचाराः इत्थं वर्तन्ते, यदीत्थं न विधीयते तर्हि राज्यानां प्रजायाः प्रतिनिधित्वमपि व्यर्थं भवेत् ।

यदीश्वरेच्छया स्वास्थ्यं समीचीनं भविष्यति, तदा सम्भावितनागपुर-कांग्रेससभायामुपस्थितो भूत्वा ममात्मीयानुभवेन सह भवतां समक्षं विस्तृतविचारान् उपस्थापयिष्यामि । आशासे यत् देशीयराज्यानां प्रजाः निजसमकक्षतार्पणहेतुना कांग्रेसोपसमितेरभिप्राये उपरिनिर्दिष्टपरिवर्तनं कारयितुं भवन्तः सम्मताः भूत्वा सहायकाः भविष्यन्ति ।

राजस्थानकेसरीकार्यालयः
वर्धा सी.पी.
ता. १६-११-१९२०

भवदीयः
ठाकुरः केसरीसिंहः

४. राजानः ब्रिटिशसर्वकारश्च (तदानीमिदानीञ्च)

(केसरीसिंहस्य 'चारण' इति मासिकपत्रिकायाः प्रसिद्धे लेखे रजवाडाविषये ब्रिटिशसर्वकारविषये बहु–बहु–कथनं प्रकटीभवति, तस्यात्र भाषान्तरं प्रस्तुतमस्ति।)

मम पूर्वस्मिन् लेखे राज्ञां व्यक्तित्वमुद्दिश्य तदानीन्तनः इदानीन्तनश्च भेदो मया निर्दिष्टः, राज्ञां परतन्त्रतामयिएकश्रृङ्खलायाः चरमकणिकाविषये निर्देष्टव्यमस्ति। अत्र कश्चन प्राचीनैतिहासिकविषयो नास्ति, तथापि श्रृङ्खलासम्बन्धिदिग्दर्शनमत्रावश्यकमस्ति।

स्वार्थमग्नोऽयं संसारः, कस्यापि युगस्य कथां भवान् पश्यतु कदाचिदेव स्वार्थरहिता वार्ता स्यात्, भेदः केवलमेतावदेव, यत् स्वार्थस्य स्वरूपद्वयमस्ति, एकः सामूहिकस्वार्थः, द्वितीयो व्यक्तिगतस्वार्थः। यो देशः समाजः जातिश्च समुज्ज्वलभाग्यमिव भानोः उषां स्पृशति, तत्र सामूहिकस्वार्थ एव मुख्यो भवति। तत्र व्यक्तिगस्वार्थाः उपेक्ष्यन्ते, महाभारतस्योदाहरणमत्र द्रष्टव्यमस्ति। तदानीं कौरवाः पाण्डवाश्च सामूहिकस्वार्थमग्नाः आसन्, तस्मिन् समये कृष्णसदृशः महाविभूतिरिच्छन्नपि कौरवदलादेकमपि जनं पृथक्कृत्य पाण्डवदले सम्मेलितुं न शशाक। अयं सामूहिकस्वार्थः अद्यापि पश्चिमदेशीयसबलसत्तास्वपि प्रत्यक्षरूपेण द्रष्टुं शक्यते।

"संगच्छध्वम् संवदध्वम् सं वो मनांसि जानताम्" अस्य वेदमन्त्रस्य व्यावहारिकमनुष्ठानं तत्र भवति, तदेव तेषां प्रगतेः आधारस्तम्भोऽस्ति, यस्मिन् देशे व्यक्तिगतस्वार्थस्य प्रभावो भवति तत्र तेषाम् अस्तित्वमेव न भवति अथवा दासत्वस्थितावेव जीवनं यापयन्ति, 'दुर्भाग्येनायं व्यक्तिगतस्वार्थ एव भारतं नैकशतकेभ्यः पारतन्त्र्यश्रृङ्खलायामबध्नात्' अयमेव भेदः तदानीन्तस्य

इदानीन्तनस्य च। अद्यापि देशीराजानः पारतन्त्र्याय स्पृह्यन्ति, तदेव तेषामधःपतनस्य सर्वनाशस्य च मुख्यं कारणमस्ति।

यद्यपि भारते मुस्लिमसाम्राज्यस्य पराधीनतायाः आवरणमासीत् पूर्वत एव। केवलं मेवाडराज्यमेव पूर्णस्वातन्त्र्यार्थं मुस्लिमसाम्राज्यस्य समक्षं युद्धमङ्गीकृतवान्। अन्यानि राज्यानि दिल्लीसाम्राज्यस्य प्रभावमङ्गीचक्रुः। ते राजानः यद्यपि स्वगृहे स्वतन्त्राः आसन्, परन्तु ते निर्बला अभवन्नेव, तस्याः निर्बलतायाः कारणं मुस्लिमशासनं नासीत्, यतो हि पठानमौगलशासकाः वीरा आसन्, भेदनीतिं ते नैच्छन्, तेषां जीवनस्य हानि–लाभ–जीवन–मरणादिकं सर्वम् अनेन भारतदेशेन सह ओतप्रोतमासीत्। परन्तु देशीयराज्यानां ईर्ष्याद्वेष–स्वार्थपूर्णगृहक्लेशादिकारणेन व्यक्तिगतजीवने जातिगतसामाजिकजीवनेऽपि ऐक्यभावनाया अभावत्वात् पारतन्त्र्यपूर्णमानसिकत्वात् स्वार्थस्य ज्वाला प्रदीप्ता आसीत्, 'कस्य प्रीतिः, कस्य जातिः'' कदाचित् परिस्थितेः दुःखमनुभूय भाविनिकाले, उन्मुक्तवातावरणे समागत्य राजानः परस्परं सम्मिलिताः भविष्यन्ति, अन्यथा ते स्वयं विनष्टा भूत्वा भारतस्य मानचित्रमेव परिवर्तितं करिष्यन्ति, परन्तु ईश्वरस्य विधानं किञ्चिद् भिन्नमेवासीत्।

मुस्लिमसाम्राज्यस्य पतनकाले ''ईस्ट-इन्डिया-कम्पनी'' इत्यस्य स्वरूपेण ''Divide And Rule'' विभाजनेन राज्यं करोतु इमां भेदनीतिमेव मूलमन्त्रमङ्गीकुर्वाणाः पाश्चात्यगौरशासकाः समाजक्षेत्रे भेदनीतेः बीजवपनं कृत्वा स्वार्थमयं गोमयविकृतिं निक्षपन्ति, मुस्लिमबादशाहाः शासकाः तथा हिन्दुराजानः इमां भेदनीतिम् अनवगम्य परस्परमेव युद्धरताः भवन्ति। ततस्ते 'सुलह' (समाधान) नाम्नः गूढजालिकायां निमग्नाः अभवन्, स्वगृहे एव बाह्यातिथिरूपेणाभवन्।

''इस्ट-इन्डिया-कम्पनी' इत्यस्येयं प्रवृत्तिः अन्ततो गत्वा ब्रिटिशसाम्राज्यत्वेन परिवर्तिता बभूव। ततः किमभवत्? कथमभवत्?

इत्यादिवर्णनम् इतिहासकाराणां विषयः, इतिहासे विस्तरेण वर्णितमस्ति। अतोऽत्र किमपि न उच्यते, एतावदेव जानामि, यत् इंग्लेण्डस्य राजा, भारतसम्राट्मन्दिरे स्थापितामूर्तिरिव लण्डननगरे विराजमानोऽस्ति, असावस्माकं सम्माननीयोऽस्ति। भारतीयराज्ञां भाग्यं वाईसरोयहस्ते वर्तते, सः सचिवमाध्यमेन, इंग्लेण्डस्य संसदीयमन्त्रिमण्डलद्वारा समर्पितं दायित्वं निर्वहति।

भारतीयसर्वकारः ब्रिटिशसर्वकारश्चेति द्वयोरुपरि भारतीयराज्ञां भाग्यमवलम्बते। तदेव राजकीयगठबन्धनस्य वैचित्र्यम्।

तदानीं प्रत्येकं राज्यस्य राजधानीषु एकैकः मध्यस्थोऽभवत्, ते सर्वे सूक्ष्मदृष्टयः निरीक्षकाः आसन्। एतत् पदं प्राप्तुं अधिकं वैदुष्यमावश्यकं नासीत्, अत्र केवलं गौरजनानामेव वरणमभवत्, तथाप्यसौ व्यवहारे पटुतरो भवेदेव, यदि तस्यै समुचितसहयोगः प्राप्नुयात्तदा स्वर्गीयसुखं लब्धुं राजकीयक्षेत्रेऽप्यसावानीयते स्म। किञ्चित्कालपर्यन्तं तस्य प्रशिक्षणमावश्यकमासीत्, गूढवाक्यानि बौद्धुं समर्थः स्यात् अर्थात् स एव जनः राजनीतिज्ञः कथ्यते यः सर्वविधकार्यं, स्वामिनः भावञ्च योग्यसमये झटिति सम्यग् बौद्धुं शक्नुयात्, यस्य फलं समयानुकूलं स्वामिपक्षे एव प्राप्नुयात्। उपरितनात् यथासमयं गुप्तसूचनाः सततं मिलन्ति, तेन कारणेन तस्य कीदृशोऽपि स्वभावः स्यात् तथापि सः सुस्थिरो भूत्वा मुख्यसूत्रधारो भवति, राज्यस्य प्रायः सर्वाधिपत्यं तस्योपर्येव भवति।

तस्य जनस्याज्ञा कदाचिदेव खण्डिता भवति, तेषां अपराधाः क्षम्याः भवन्ति। अस्माकं राज्ञाम् आंग्लशासनेन सह राजनैतिकसम्बन्धोऽपि भ्रष्टाचारस्य स्रोतांसि एव वर्तन्ते, तस्य वर्णनं महीयसि ग्रन्थे रचितेऽपि पूर्णं न भवेत्, यतो हि नीतिरियं पात्रस्थितिसमयावश्यकतानुरूपं गन्धर्वलेख इव परिवर्तिता भवति, तदेवाधिकारवृद्धेः मूलं भवति, यदि शासनस्य विरुद्धविचारशीला जनाः नेतारो वा अग्रे आगच्छन्ति, तदा तैः सह विभिन्नरीत्या-भिन्नप्रकारेण च आंग्लशासकाः व्यवहरन्ति। तदानीं यदि

देशस्य कस्मिंश्चितक्षेत्रे अशान्तिः दृश्यते तदा राजान एव दोषभागिनः मन्यन्ते, यदि शान्तिर्भवति तदा राज्याश्रितमुख्यप्रतिनिधयः कमपि सामान्यमाध्यममग्रेकृत्य कस्यापि विरोधिनः राज्ञः मुखं मौनीकुर्वन्ति।

मयाऽनुभूतं, यत् राज्ञां स्थितिः कारागृहिणामिव वर्तते। राजकीयविभागस्यादेशं विना ते परस्परं मेलितुमपि न शक्नुवन्ति। स्वतन्त्ररूपेण पत्रव्यवहारमपि कर्तुं न शक्नुवन्ति, अपि च स्वराज्यसीमानं परित्यज्यान्यत्र गन्तुमपि न पारयन्ति, सम्बन्धिनां मृत्युविवाहादिसामाजिकप्रसङ्गेषु गमनायानिवार्यत्वं प्रमाणीकुर्यात् तदपि राजकीयविभागस्याज्ञां लब्धुं सफलो भवेत् तथापि तत्रत्यावासीयाधीक्षकस्येच्छा भवेत्तदेव बहिर्गन्तुं समर्थो भवितुमर्हति स्म। तत्रापि स्थानिकाधिकारिणां दृष्टावेव कार्यसम्पादनमभवत् यदि कोऽपि स्वकीयं स्वाभिमानमधिकारञ्च प्रदर्शयितुं चेष्टते तदा तस्य नाम्ना तदन्तर्गतं आरोपजन्यम् आक्षेपं कृत्वा मानसिकं भयमुत्पाद्य सर्वथा सर्वदाऽसौ मौनमेव तिष्ठेत्तथाऽऽङ्ग्लसर्वकारोऽकारयत्।

५. केसरीसिंहस्य विद्वता

ठाकुरसाहेबस्य धर्मपत्न्याः अवसानान्तरं यदा अहं तेन मेलितुं गतवान् तदा तस्य मानसिकक्षमतायां विशेषतया कोऽपि विक्षेपः जातः तादृशं न प्रतीतम्। स्वजीवनसंगिन्याः रुग्णता तथा च अन्तिमालापानां संक्षिप्तं वर्णनं सः तथा श्रावितवान् यथा कस्यचित् दुःखान्तनाटकस्य सारः भवेत्।

काश्यां भारतधर्ममहामण्डलस्य अधिष्ठाता प्रख्यातः संन्यासी स्वामी ज्ञानानन्दः आसीत्। ठाकुरस्य पत्रेण तेन सह मेलनम् अभवत्। स्वामिनः तस्योपरि विशेषः स्नेहः आसीत्। तस्य गुणानां, विद्वत्तायाः चातुर्यस्य च सः प्रशंसां करोति स्म। स्वामी ज्ञानानन्दः संन्यासात् पूर्वं मेरठे सुखी गृहस्थः आसीत्। तस्य सांसारिकं नाम योगेश्वरबाबू आसीत्। सः स्वामिविवेकानन्दस्य उपदेशैः प्रभावितो भूत्वा संन्यासं स्वीकृतवान्।

विपत्त्यनन्तरं ये के अपि ग्रन्थाः ठाकुरसाहेबस्य समीपे अवशिष्टाः तेषु तस्य अधिकः अनुरागः आसीत्। सप्तशतम् अष्टशतं वा ग्रन्थानां संग्रहः अपि तस्य भव्यां रुचिं परिचाययति। तस्य अभ्यासः अधिकतः संस्कृतभाषया जातः किन्तु बंगाली, मराठी, गुजराती, प्राकृतादीनाम् अपि ज्ञानं सम्यग् आसीत्। एकदा सः बंगालीभाषायां किमपि छन्दः लिखित्वा बंगालीसज्जनं प्रति प्रेषितवान् तदा सः सज्जनः अस्य लेखकः कश्चित् बंगालीयः साहित्यकारः स्यात् इति अमन्यत। यदा तौ मिलितवन्तौ तदा बंगालीयः सद्गृहस्थः मुग्धः अभवत्। गुजरातीभाषायाः प्रसिद्धः लेखकः, मम सम्मान्यः सुहृद् स्व. शिवप्रसाद-दोलतराम-पण्डितः स्वात्मानं ठाकुरसाहेबस्य शिष्यं मन्यते स्म। तस्य गुरुवत् आदरं करोति स्म।

कारणेन तस्य प्रकाशनम् इदानीं पर्यन्तं नाभवत्। अनुवादः अत्युत्तमः अस्ति। तस्य प्रतिलिपिः मम समीपे अस्ति। अहं ठाकुरसाहेबाय वचनं दत्तवान् यत्, 'एतदर्थम् अहं भगवतः बुद्धस्य आवश्यकचित्राणां संग्रहं करिष्यामि। तथा च बुद्धग्रन्थानाम् अवतरणानि(उद्धरणानि) स्थापयिष्यामि। तत्कार्यम् इतोऽपि अहं न कृतवान्।

एकदा ठाकुरसाहेबस्य द्विगुणः 'न्युमोनीया' रोगः जातः। सः अस्वस्थः आसीत्। कष्टानि सोढ्वा तस्य शरीरं जर्जरितं जातम्। केवलं मनः प्रबलम् आसीत्। तस्यैव आधारेण सः शरीरवहनं करोति स्म। किन्तु द्विगुण–न्यमोनीयावशात् सः खट्वां प्राप्तवान्। चिकित्सकाः अकथयन् तस्य इदानीं तीव्रवेदना अस्ति, श्वासग्रहणे अतीव कष्टं भवति स्म, कासः बाधते तत् अधिकम्। कृशं शरीरं कृशतरं जातम्। यदा अहं तत्र प्राप्तवान् तर्हि सः स्मितं कृतवान्। रुग्णतायाः असह्यवेदना प्रत्यक्षं दृश्यते स्म। किन्तु वदनरेखासु तां पीडां सः न प्रकटितवान्। अनन्तरं शान्तिपूर्वकं स्वदुःखवर्णनं तथा कृतवान् यथा वैद्यः रुग्णस्य परिस्थितिं श्रावयेत्।

यदा ठाकुरसाहेबः केचन मासाः यावत् रामगढपर्वते (कोटाराज्ये) एकान्तवासं गतवान् तदा ततः प्रत्यागमनसमये मदर्थं शिवमन्दिरस्य शिलालेखस्य प्रतिलिपिम् आनयत्। सहैव मन्दिरस्य संक्षिप्तं वर्णनं विशेषतां च हिन्द्यां लिखित्वा आनयत्। मया काशीविश्वविद्यालयस्य विख्यातविदुषा डॉ. अनन्तदास–शिव-अलतेकरेण सह तत् द्वि–त्रिवारम् अवलोकितं चेत् ठाकुरसाहेबस्य तीक्ष्णां दृष्टिं ज्ञात्वा अहम् आश्चर्यचकितः अभवम्। कश्चित् तज्ज्ञः अपि तावत् सूक्ष्मतया वर्णनं कर्तुं न पारयेत्।

एकदा ज्येष्ठमासस्य घर्मकाले द्विसप्ततिहोरापर्यन्तं 'मणिभवने' शिलासनं कृत्वा गायत्रीमन्त्रजपं कृतवान्। तादृशम् अद्भुतं शरीरं, दृढमनोबलं च दृष्ट्वा सर्वेऽपि मन्त्रमुग्धाः जाताः।

ठाकुरसाहेबस्य वार्ताः रसपूर्णाः आकर्षकाः च आसन्।

संस्कृतसाहित्यस्य विभिन्नानाम् अङ्गानां ठाकुरसाहेबः तज्ज्ञः आसीत्। काव्यशास्त्रस्य महान् मर्मज्ञः आसीत्। मम्मटः, दण्डी, जगन्नाथस्य रसगंगाधरः, विश्वनाथः इत्यादीनां काव्यसिद्धान्तान् सः तादृशघटनावत् स्पष्टतया वैशिष्ट्येन च जानाति स्म। दर्शने तस्य विशेषा अभिरुचिः आसीत्। सांख्ययोगयोः विशेषं ज्ञानं धारयति स्म। गणितज्यौतिषे अपि सः जानीयात् किन्तु तद्विषये लेखने अहम् अधिकारी नास्मि। द्वि–चतुर्वारं तेन नक्षत्राणि, विशिष्य नीलगगनं वीक्ष्य मम समक्षं सूर्यसिद्धान्तस्य अन्येषां च सिद्धान्तग्रन्थानां चर्चा उपस्थापिता। किन्तु अहं पुनः तेन न मिलितवान् अतः सः प्रसंगः पुनः नोपस्थितः।

ई.स. १९२८–२९ मध्ये ग्रीष्मकाले काशीतः कोटाम् आगतः तदा प्रसंगवशात् अहं भगवतः बुद्धस्य जीवनविषये कामपि वार्तालापम् आरब्धवान्। संभवतः लुम्बिनीवने तस्य अलौकिकजन्मविधेः प्रसङ्गः आसीत्। यदा अहं कवेः अश्वघोषस्य 'बुद्धचरितस्य' उल्लेखं कृतवान्, तदा सः तस्य ग्रन्थस्य इमम् अंशं श्रावितवान्–

"अस्य हि सधर्मं न हि प्रवतां तृषार्दितः पास्यति जीवलोकः।"

अयं श्लोकः न केवलं बुद्धचरितस्य अपितु सम्पूर्णबौद्धधर्मेतिहासस्य सरसः सारः अस्ति। इदम् अवतरणं ठाकुरसाहेबस्य प्रगल्भपाण्डित्यं परिचाययति।

तदानीमेव ठाकुरसाहेबः स्वपुस्तकालयात् बुद्धचरितस्य एकां सुन्दरपाण्डुलिपिम् आनयत्। इयं लिपिः तेन स्वहस्तेन उदयपुरस्य सरस्वतीभाण्डारात् उद्धृत्य सज्जीकृता। अद्यत्वे तस्य ग्रन्थस्य प्रकाशनं जातम्। किन्तु तदानीं स अप्रकाशित आसीत्। तस्मात् स्वान्तःसुखाय एतावत् परिश्रमं कृत्वा सा प्रतिलिपिः कृता। मम प्रस्तावं स्वीकृत्य सः तस्य हिन्द्याम् अनुवादकार्यं स्वीकृतवान्।

मम विदुष्याः भगिन्याः कु. रामप्यारीबाई-शास्त्री (एम. ए. बी. टी.) सहयोगेन सः तत्कार्यं स्वजीवनकाले समापितवान्। केनचित्

बनारसे लक्ष्मकुञ्जे एकः बङ्ग-विद्वान् डॉ. नलिनमहेता आसीत्। सः लेखन्या एव जीवननिर्वाहं करोति स्म। आंग्लस्य इतिहासस्य सः महान् ज्ञाताऽऽसीत्। कोटायाः आख्याने सति शीघ्रमेव सः ठाकुरमहोदयस्य विषये अपृच्छत्। यदाऽहं संपर्कस्योल्लेखं कृतवान् तदा सः प्रीतो जातः। मह्यम् अकथयत् इतः परं केसरीसिंहस्य हस्तेन लिखितं पत्रं नीत्वा आगच्छतु तदाऽधिकं वार्तालापं करिष्यावः। ठाकुरमहोदयः वैद्यस्य नाम्ना पत्रमलिखत् तत्र आवयोः घनिष्ठताया उल्लेख आसीत्। डॉ. नलिनः मामपि मित्रमवगच्छति स्म। तस्मिन् समयेऽहं काश्यां विश्वविद्यालये आचार्यकक्षायां पठन् आसम्। नलिनः अष्टवर्षाणि जर्मनदेशे न्यवसत् तथा महान् क्रान्तिवीरः आसीत्।

ई.स. १९३३ तमे महात्मनः गान्धिनः अध्यक्षत्वेन इन्दौर हिन्दीसाहित्यसम्मेलनमभवत्। तत्र महाराजः हॉलकरोऽपि मञ्चोपरि आसीत्। विसर्जितायां सभायां विस्मितः सः निमेषत्रयं ठाकुरमहोदयेन सह वार्तालापमकरोत्। सभायामुपस्थिताः गणमान्याः सज्जनाः ठाकुरमहोदयेन आदरपूर्वकं मिलिताः। ई.स. १९३२ तमे यदाऽहम् अभ्यासं पूर्णं कृत्वा काशीतः कोटाम् आगतः तदा सप्ताहे द्वित्रिवारं ठाकुरमहोदयेन मिलामि स्म। सः सदा साहित्येतिहासदर्शनानां चर्चां करोति स्म। अहं जानामि स्म यत् अहं काशीविश्वविद्यालयस्य निष्णातेन आचार्येण सह चर्चां कुर्वन् अस्मि।

ठाकुरमहोदयः संस्कृतसाहित्यस्य मर्मज्ञः आसीत्। रसालङ्कारध्वनिग्रन्थानां सम्यक् ज्ञानं धत्ते सः। दर्शनाद्वैतसांख्याः तस्य रसविषयाः आसन्। तस्य स्वभावे अद्भूतो विनयः विवेकश्चास्ताम्। कोटायाः महाराजः उमेदसिंहः तस्यादरं विदधाति स्म। जनरल ओमकारसिंहः तस्य प्रगाढमित्रमासीत्।

***

मर्दयन्ती

सीतामडराज्यं महआ (राजस्थानम्) इत्यस्य वयोवृद्धः ठाकुरखुमाणसिंहः 'कालियाशतकम्' इति विलिख्य कानिचित् दोहाकाव्यानि केसरीसिंहाय अप्रेषयत्। केसरीसिंहस्य मतानुसारं तस्मात् एकं काव्यं सः स्वसन्दर्भे अस्ति इति अनुभूतवान्।

पञ्चदोहाकाव्येषु कविः स्वस्य न, किन्तु मातृभूमये वेदनां प्रकटीकृतवान् अस्ति। कीदृशानि एतानि काव्यानि।

घनरे बलधणियाप, सहृण्या नरभीसांचवै,।
पोरस तणे प्रताप, कठिण बडापन कालिया।।

(धनबलेन तु सामन्यजनोऽपि अग्रे गन्तुमर्हति किन्तु पुरुषार्थबलेन जयत्वप्राप्तिस्तु दुर्लभा एव।)

जन्मभूमि जे जोय, गोरा पगदल गुंजती,
खत्रवट सारी खोय, कूडा अंजसै कालिया।

(आंग्लानां पादतले मर्दयन्तीं मातृभूमिं ये दृष्टवन्तः तदैव क्षत्रियपराक्रमस्य कलङ्कः जातः। इदानीं ते किमर्थं मिथ्याप्रदर्शनानि कुर्वन्ति।)

गुवरमेंटरी गाय, बणिया ठाकर बाजबै,
कुरब बतावै काय, करतब हीणा कालिया।

(ब्रिटिशसर्वकारस्य पुरतः धेनुरिव दरिद्रो भूत्वा वणिक्पद्धत्या ठाकुरो भवति। एतादृशैः हीनकार्यैः कथं तस्य यशो वर्धते।)

खोपट माहे खाय, गोरां पग चूमें गजब,
निलजा कुरबां न्हाय, करम विहूणा कालिया।।

(स्वमानम् उज्जयित्वा आङ्ग्लानां पादसेवां कृत्वा ये तेषाम् उच्छिष्टं खादन्ति, ते निर्लज्जाः भूत्वा गर्वं कुर्वते)

'केहर' री कुणकांण, भिडणो सो किम भूलवे,
नाम धरम पहचाण, कोइक जाणे कालिया।

(वनराज इव केसरीसिंहकुलरीतिस्तु प्रत्यक्षसंघर्षपूर्णा वर्तते) स्वनामधर्मपरिचयं तु केचन विरला एव विदुः।)

***

(केसरीसिंहस्य दोहाकाव्यान्यत्रोदाहृयन्ते। स्वभाषया लिखितानि तानि काव्यानि तथैव अत्र संस्थाप्यन्ते, भावविप्रतिपत्तित्वात्)

प्रिय-पार्थाय-सारथये काव्यम्

लोक–पथ–दर्शक सुभव्य था चरित तेरा,
यद्यपि कन्हैया! तेने लिये रूप नाना हैं।
राजा–सत्ता लोभ वश रचती कुचक्र जब,
न्याय सत्य शांति का न रहता ठिकाना हैं। ।। १ ।।
अपने बिगाने का भी भेदभाव हेय मान,
नवीन निर्माण नाश ही में पहिचाना हैं।
एहो क्रांति–धारा के धुरीण! धर्म हेतु धारा,
वही अति प्यारा हमें सारथी का बना हैं। ।। २।।
गोधन चराना मनमोहक बजाना बंशी,
गिरि को उठाना त्रस्त ब्रज को बचाना हैं।
रास का रचाना ग्वाल ललना रिझाना कभी,
कंस को पछाड़ कर स्वर्ग पहुँचाना हैं। ।। ३ ।।
नाना रूप अद्‌भुत तुम्हारे रहे दीनानाथ,
चीर बढ़ा द्रौपदी की लाज रखवाना हैं।
मोहन ! हमें तो तेरा सेवाभाव–मयी भव्य,
वही पूर्ण प्यारा दिव्य सारथी का बना है। ।। ४।।

आत्मनिवेदनम्

साम्राज्य–शक्ति शत्रु वही सर्वस्व था सो कढ़ गया ।
प्रिय वीर पुत्र प्रताप–सा वेदी बली पर चढ़ गया ।
भ्रात जोरावर हुआ प्यारा निछावर पथ वही,
पतित–पावन दीनबंधो ! शरण इक तेरी गही। ।।१।।
विश्वासघाती हुए साथी (जो) सुख सुनाते मरण में,
समय पड़ने पर हहा ! तजि गये शत्रु शरण में।
काल–कोठरि कठिन कारागार की साक्षी रही,
पतित–पावन दीनबंधो! शरण इक तेरी गही। ।।२।।
स्वार्थी सहोदर ने भरी कारी कलेजे चुटकियाँ,
भयभीत बांधव मित्र गण ने भी चुराई अँखियाँ।
देशभक्ति पर विषम उपहास की तानें सही,
पतित–पावन दीनबंधो ! शरण इक तेरी गही। ।।३।।
घाव दु:ख के सह लिए कुछ धीर हूँ अभिमान था,
किन्तु सच आधार में प्राणेश्वरी का प्राण था।
उस 'मणी' बिन हो गयी अंधार–मय सारी मही,
पतित–पावन दीनबंधो ! शरण इक तेरी गही। ।।४।।
अज हौं न मेरी जननि का दासत्व बंधन कट चुका,
मातृ-क्रंदन मांगना आहूतियों का नहीं रुका।
बोटियाँ तन की उड़ें अभिलाष अब भी है यही,
पतित–पावन दीनबंधो ! शरण इक तेरी गही। ।।५।।

दोहा

विपदा घन सिर पर घुटे, उठे सकल आधार।
ग्राम धाम सब ही लुटे, बिछुटे प्रिय परिवार। ।।१।।
राम–चरित सिखवत यही, है समर्थ विधि हात।
दिन दख्यो देखी निशा, पुनरपि भयो प्रभात। ।।२।।
वर्ष चतुर्दश विपत्ति के, ढाहत विकट बलाय।
कहा कथा मो दीन की, राम हि दिये रुलाय। ।।३।।
राम सिया के साथ में, पुनि सनाथ गृह कीन्ह।
हन्त ! विपत्ति के अन्त में, मेरी 'मणि' रही न।।।४।।
कहत विज्ञ इतिहास को, पुनरावर्त्त प्रयोग।
नृप उमेद कवि 'केहरी', कृष्ण सुदामा योग। ।।५।।
मन उमंगि सब ही मिले, राव रंग राजपूत।
यह कोलाहल कान परि, भर्‍यो खलन हिय भूत।।।६।।
कायर चुगली करन में, होत दक्ष हित साधि।
क्षत्रिय-शिक्षा को दई, राज–विरोध उपाधि। ।।७।।
अंग भंग के रंग तें, तजी बंग हिय हार।
सद्य हि दाझी दूध की, चौंकी परि सरकार। ।।८।।
ग्रह्यो मोहि गिन अग्रणी, रह्यो न धीरज रंच।
नीति कुटिल पथ ही जँच्यो, विरच्यो विकट प्रपंच।।।९।।
पडि भागे वे भेड ज्यों, जो देते कर पीठ।
एक धर्म के प्रेम बल, दिवस निभाये नीठ। ।।१०।।
स्वारथ–रत स्वमिहु सहज, यह सुयोग निज पाय।
द्वादश पीढ़िन की कठिन, सेवा दिय बिसराय। ।।११।।
सबहि हर्‍यो विष तें भर्‍यो, कर्‍यो क्रूर आदेश।
रहनन पैहों छिनहिं यहाँ, जो प्रिय लज्जा लेश। ।।१२।।

ले अबोध असहाय शिशु, कढि अबला तजि भौंन।
सकल नगर आँसू लखत, कियो पितृ–गृह गौन। ।।१३।।

नीतेः दोहाकाव्यानि

जड़ शरीर के स्वार्थ में, जग बन रहा विभोर,
उलट पुलटते देर नहिं, आज और कल और। ।।१।।
तुच्छ देह सुख क्षणिक में, उलझ रहा संसार,
पलट रहा पल पल हि में, आज द्वेष कल प्यार। ।।२।।
तरु मुरझाये पत्र तें, प्रगट करत निज प्यास।
दै न दैहि जल मेघ तऊ, छाया की दृढ़ आश। ।।३।।
सज्जन रंचहु नेह चख, जीवन सुख निबहन्त।
ज्यों लघु छज्जे छाँह में, भव्य सु भौन रहन्त। ।।४।।
धर्मकर्म की ओट धरि, निज हित जगत बनात।
केवल इक पालन करत, बिन स्वास्थ्य ब्रजनाथ। ।।५।।
पूर्ण ब्रह्म के बिन नहीं, कोऊ जग निर्दोष।
सज्जन पर गुण गान कर, पावत मन संतोष। ।।६।।
सुन्दर तन को छाँड कर, घावाहिं ढूँढने जात।
वे मक्खी से नीच नर, निंदक चुगल कहात। ।।७।।
गुण देखै भी चुप रहे, दम्भी अरु अप्रतीभ।
वह अपराधी ईश को, वृथा मिली तिंहिँ जीभ। ।।८।।
ढिग अनेक सरवर भरे, सबकी तृषा बुझाय।
मेघ बूंद की आश पैं, चातक प्यासो जाय। ।।९।।
कहा कहों कहत न बने, कही झूठ सब होय।
मूक रहन यातें भलो, हिय की हिय में जोय। ।।१०।।

सात्विक और सुपात्र में, दियो दान जग मांहि।
वन्दनीय शास्त्रन कह्यो, वही अमर रहि जाहिं। ।।११।।
शुद्ध नीति निरमल चरित, क्षमा सत्य थिर तन्त्र।
अमद अलोभ उदारत (यह), वशीकरण को मंत्र। ।।१२।।
टके बिना अटके रहें, टके टके के जोर।
बनिये गति बनिये रहें, यहें न मानें ढोर। ।।१३।।
कवि कोविद कर्मठ चतुर, दिन काटे दुःख संग।
गहली लक्ष्मी नँह गिणें, अणघड़ मूढ़ अपंग। ।।१४।।
किण रा ही दिन एक-सा, रह्या न रहसी फेर।
सहज बणे अहसान फिर, बणी समय री बेर। ।।१५।।
मंत्र शक्ति बिन बरन नहिं, नहिं औषध बिन मूल।
त्यों अयोग्य कोऊ नहीं, यो जग दुलभ उसूल। ।।१६।।
उदय होत नक्षत बहु, जिनतें लाभ न आश।
उदय भलो वा मित्र को, जिंहिं जग होत प्रकाश। ।।१७।।
बनी सु ब्रज के काठ की, तिरी यमुन उर छेम।
नैया जीरन वही तऊ, करत कन्हैया प्रेम। ।।१८।।
कामधेनु गैया हुती, पोषत मैया नेम।
दूध सुखि लतियात तउ, करत कन्हैया प्रेम। ।।१९।।

धनाक्षरी

आज लौं सह्यो जु नील-लोहित व्है काल बेग,
अब तो त्रिलोचन उधारि हर दैव शाप।
खाली ही कपाली रही रही ना कपर्द पास,
वामदव व्है के अंधकारी रचे अंध छाप।
पति व्है अपर्णा के क्यों पर्णना के साची भये,
गंगाधर सिर पें प्रतिज्ञा करो क्यों न आप।

व्है तो शिव साँचे हिन्द–शव उठै हो अब,
भाव सुधरे हो चन्द्रघर जू हरे हो ताप।।

दोहा

देश प्रेम तजि खेतरी, अलखि जगावन आ।
अज्जमेरु तुम भले बसै, तजि विलास कैलास।
नाम हु ते माधव नहीं, पें काम हु तें सिद्ध।
वा थल बन्दे भारतम्, कैसे भई प्रसिद्ध।।

***

लालालजपतराय-

कवित्तकाव्यम्

देश के दुलारे लाल मारे जात डंडौ मौत,
देखते तुम्हारे हारे कायर सिटाओगे।
ललकि भिडंत के नगारे चोट देके अब,
ओट ले अहिंसा की क्या किस्सा ही मिटाओंगे?
सहज उपाय हाय ! वही ना निभाय सके,
खादी बिसराय परदेशी की भिटाओंगे।
लाज बोरि रेता में फजेता जननि का करि,
कहो ! प्यारे नेताओं को कहाँ लौं पिटाओंगे?

भारतेन्दुः बाबूहरिश्चन्द्रः

मनहरः च

अंकुर सु नागरी को पोष्यो रस सींचि सींचि,
ग्रीषम मे आलबाल बांधि सुकुमार पें।
वही लैलहानी जग जानी तब दिव्य बानी,

रानी बनि चढ़ी राष्ट्र–भाषा अधिकार पें।
रसा सरसावें बरसावें क्यों न पावस ये,
झूमि झूमि आवें अब घन घनसार पें।
जोलौ हिन्दी हिन्दी एहो ! भारत के इन्दीवर।
लागि हैं न बिन्दी तोली सेरे उपकार पे।।

आंग्लकूटनीति-
कवितकाव्यम्

श्वेत टकसाल 'गौरामिंट' है अदृश्य बला,
असली स्वरूप यांको सर्व जन जाने ना।
जाहि घर घुसै ताहि करत श्मशान रूप,
बुद्धि को बिगारि नंगे नाच में लजाने ना।
सबं उपहार हार छूटे प्राण सोखे लेत,
तंत्र–पटु गांधी बिन आय हैं ठिकाने ना।
असहयोग मंत्र फूंकि–बीसी हू की तीसी मांहि,
शीशी में उतारे बिन भूत यह माने ना। ।।१।।
राज–मद माते राहे चहरे लजाते नाहिं,
सबें खोसि खाते जहाँ तहाँ कुछ पाते हैं।
पर घर घुसि जाते अपनी मनाते आन,
विवश बनाते दास दीन बिललाते हैं।
सतत सताते न्याय सत्य को बताते धता,
करि करि ताते घाव नोन छिटकाते हैं।
आते हैं जु वही दिन आते हैं ठहर जाओ,
दम्भी जब दांत तले तिनखे दबाते हैं। ।।२।।

दोहा

भारत के सिर श्याम थे, वह यौवन सुखदास।
सामराज्य बुढ़िया गया, चढ़ी सफेदी आय। ॥१॥

भारतीयनारी

(काव्यम्)

मानव समाज की बिगारी दशा स्वारथ ने,
कहत अनारी नारी अबला कहावेंगी।
नर नाम धारी सत्ता मांगत भिखारी बनि,
लाज हू न धारी बात जगत हँसावेंगी।
भूमि महतारी अत्याचारी पद रौंदी जात,
अब तो हमारी बारी कदम बढ़ावेंगी।
टरकें जहाँ पैं नर फरकै हमारी बाँह,
भरकै उछाह रन करकै दिखावेंगी॥

दोहा

डंडा बल पशु झुंड पर, पंगहु होते समर्थ।
वीरप्रेम बल बलिन पैं, समझत शासन अर्थ। ॥१॥
दीन प्रजा अरु नारि पर, क्षत्रि न शस्त्र उठाय।
पर–हित में निज हानि को, सहत वीर हरषाय। ॥२॥
मान ! मान अभिमान तज, सुत सम जान प्रजान।
चमन उजारहिं दमन यह, अन्त आपकी हान। ॥३॥

मनहरः

जनता के बल ही से जर्मन कँपाते जग,
माने जात 'पर' वहाँ पुथले जहर के।
पर–मुख ताकि रहे नृपति हमारे हाय !
लेते हैं उबासी नर–रत्न निज धर के।
अपनी प्रजा को हिय हरषि संतोष लेहु,
सुनिये विनय नाथ ढूंढाहर घर के।
प्रेम से विजय पाना यही वीर बाना मान !
योय है न आजमाना हाथ हिटलर के। ।।१ ।।
खो चुके पराये हाथ निज अधिकार भार,
प्रजा के सहारे शेष फिर से बचाओंगे।
थाती पूर्वजों की जाती रहेगी संगाती संग,
जो न प्रजा–प्रीति पटुता दिखाओंगे।
भक्ति जनता की अजौं बाकी उस रौंदि रोंदि,
घर ही में आग फूंकि जत हँसाओगे।
पाओगे ना शान्ति सुख व्यर्थ अभिमान ठान,
तंत बिन मान ! हंत अंत पछताओंगे। ।।२।।
धन्य वह पिता जिसे पुत्र का सहारा मिलै,
भक्त प्रजामंडल की प्रीति नृप सुख है।
सत्ता निज सौंप देते हँसते पराये हाथ,
प्रजा को पराई मान डरते हो दुःख है।
आग के खिलाडियों के घर है समुद्र पार,
एहो गृह–स्वामी ! ज्वाला आपही के रुख है।
एते पें न सावधान तो तो मान ! मान लीजे,
राजपद ही से अब विधिना विमुख है। ।।३ ।।

ईटाली–इथोपिया–युद्धदोहाकाव्यम्

गूंज उठी गिर कन्दरां, धक आयां रिपु धाड।
आज बणी ईथोपिया, वा जूनी मेवाड।।

महर काव्यम्

महाशक्तिशाली शाही दिल्ली दल पोलि रह्यो,
झेलि रह्यो टक्कर प्रताप उफनाता हैं।
मुट्ठी भर गिरिमाला चाहत स्वतंत्रता की,
आततायी दम्भ भरि दासता सिखाता है।
धुग्धू–से अनेक देशद्रोही मिले शत्रु संग,
तोहू जंग रंग दिन दूनो ही बढाता है।
ईश और भुज के भरोसे मेदपाट खेलें,
वही दृश्य आज एबीसीनिया दिखाता है। ।।१।।
देश की स्वतंत्रता अखंड रखने के हेतु,
भौतिक सुखों को महाराणा ठुकराता है।
बाँकी गिरिमाला की विकट घनी घाटियाँ में,
घेरी आततायिन के छक्के छुडवाता है।
दूत यमराज के-से भील ओ सुभट वीर,
वृन्द बलिवेदी पर सरबस चढाता है।
धन्य मेदपाट ने लिखाये इतिहास पाठ,
वे ही ठाट आज एबीसीनिया दिखाता है। ।।२।।

निर्दयजर्मनी–

कविताकाव्यम्

मानवता काँपि रहि धर्म सभ्यता के नाम,
दासता से दु:खी मन जन अवनी के हैं।
नाजी व्यर्थ नाज करें करके अकाज आज,
फैले हुए कण हलाहल की खनी के हैं।
बाल बृद्ध दीन अबलायें क्रुर कलायें झोंकि,
दूत यमराज सर्पतेलिया बनी के हैं।
सहिहैं न भूमि भार व्है हैं अन्त खार छार,
कहि हैं न कोई जर्मनी के 'जर्म नीके हैं।

***

वीर धरा बंगाल, क्रांतिपथ धारण कियौ।
जगी सुतंतर भाळ, कूदरं पड़ियो केहरी। ।।१।।
मेटण संकट मात, बंधी कमर बंगालियै।
सजियौ ज्यारै साथे, कुटुंब सहेतौ केहरी। ।।२।।
बंब जुद्ध बंगाल, आंगवियौ अंगरेज सूं।
तद वागो रिण ताल, कारण भारत केहरी। ।।३।।
उण पुल में अंगरेज, दूजा भगवत दीसता।
शुरवीर रा सैज, करी न परवा केहरी। ।।४।।
पाका किया प्रबंध, बंबां बाला बारहठ।
सजियौ व्यूह संबंध, कारण भारत के हरी। ।।५।।
जननी भल जायोह, उजवाळी रजवट इळा।
अंगरेजां आयोह, कणणे बाथां केहरी। ।।६।।

दिली लाट दरबार, लाखां दळ दोळा लिया।
हूवो बंब रौ वार, करामात सह केहरी। ।।७।।
पूत सपूत प्रताप, पळियौ सुख रै पालणे।
सहिया घण संताप, कारण भारत केहरी। ।।८।।
दे बैठौ बलिदान, पिय पुत्र परताप सो।
मरणौ धरम समांन, करगो त्यागी केहरी। ।।९।।
लागो दिली लिलाड़, बंब सबळ दरबार में।
भारत हित भभराड, करगो समहर केहरी। ।।१०।।
लागो लाट लिलाड, में बारठ बाळौ बंब।
करगो बीजण केहरी, इण स्वराज रौ अंब। ।।११।।
जोरे सौदे जेरियो, बारठ दिल्ली बंब।
उण साहंस सूं ऊपनो, औ स्वराज रौ अंब। ।।१२।।
भारथ कारण भातृ, जीवत खोयौ जोरसी।
औ वातां अखियात, करगो त्यागी केहरी। ।।१३।।
साहंसा धुनी स्वतंत्र, त्याग अनोखै तेण रौ।
मरण मात हित मंत्र, कुटंब सिखायौ केहरी। ।।१४।।
हांणी सही हजार, हिंद माता रै हेत सूं।
साचौ चारणचार, करगो परगट केहरी। ।।१५।।
पडियौ संकट पूर, उण ईहग सिर ऊपरां।
साहंस धीरज सूर, कदे न घटियौ केहरी। ।।१६।।
जबत करी जागीर, स्वारथ वस सीसोदिये।
वंके चारण वीर, करी न परवा केहरी। ।।१७।।
चारण-धरम न छंडियो, चूका छत्री चाल।
किणी सहायक ना करी, केहर संकट काल। ।।१८।।
रहियौ खरवे राव, जुध केहर री जोड़ में।
तीखौ झलियौ ताव, गाढीले गोपालसी। ।।१९।।

राजावां दखियोह, जबती सूं खरवौ जदे।
देवण नंह दखियोह, कोयण सांसण केहरी। ।।२०।।
वो घर खोसण हार, सायपुरे सीसोदियौं।
गुड़गो राज गमार, कारण पिरजा केहरी। ।।२१।।
आगम दिसट अमाप, थयौ वीर किसनेस तण।
तप स्वराज हित ताप, करगो करड़ा केहरी। ।।२२।।
औ स्वराज आयोह, तेण जिसा घण त्याग सूं।
भारत मन भायोह, करगो सेवा केहरी। ।।२३।।
कीधा वीरत कांम, रीत धरा रजथांन री।
नव भारत में नांम, करगो बारट केहरी। ।।२४।।
घर आयौ जैरां घरां, सतजुग भयौ स्वराज।
कीधी सेवा केहरी, ऊगी भारत आज। ।।२५।।
सौदे मिंत सदेव, सेवा करी समाज री।
भणै 'उदय' बिन भेव, काव्य तिहारै केहरी। ।।२६।।

सन्दर्भग्रन्थाः

१. 'पालर' हिन्दमासिकपत्रिका १९९८ तमस्य
डॉ. कन्हैयालालराजपुरोहितस्य लेखः-
चिरवन्दनीयः केसरीसिंहः बारहठः
२. डॉ. शान्तिभारद्वाजः - कविः एवं सेनानी केसरीसिंहः
३. केसरीसिंहस्य पञ्चपत्राणि (पालर पा. २४ तः २९)
४. 'फतेसिंहः मानवः' - केसरीसिंहः बारहठः(हिन्दी)
५. क्रान्तिकारीठाकुरकेसरीसिंहः - नारायणसिंहकविया
६. केसरीसिंहः बारहठः -श्रीमती राजलक्ष्मीः साधना
७. रावगोपालसिंहखरवाद्वारा दि. ३१-०७-१९३८ तमे स्वभागिनेयाय
लिखितपत्रम् -'केसरीसिंहव्यक्तित्त्वं तथा कृतित्वम्' (भाग - २)
८. चारणीसाहित्योतिहासः भागः २ (पा. २८१)
डॉ. मोहनलाल जिज्ञासु
९. चारणकविचरित्रम् - श्रीखेतसिंहः मीसणः
१०. 'चारणः' इति मासिकी पत्रिका, भावनगरम्, जून्, १९३८
११. 'चारणः' त्रैमासिकी पत्रिका, जोधपुरम्, १९४०
१२. 'चारणः' मासिकी पत्रिका, सितम्बर्, १९७८
१३. राजस्थानम् -केसरीठाकुरः केसरीसिंहः बारहठः,
पुण्यस्मरणम्(१९७६),
सं. श्रीसवाईसिंहः धमोरा, लेखकः हरप्रसादः अग्रवालः,
ब्यावरस्य लेखः

डॉ. ललितः पटेलः

योग्यता - एम्. ए., एम्. फिल्, पीएच्. डी., यु. जी. सी. नेटपरीक्षोत्तीर्णः

सम्प्रति : आसिस्टन्ट प्रोफेसर, श्रीसोमनाथसंस्कृतयुनिवर्सिटी-सञ्चालित-संस्कृतकोलेज, वेरावलम्, गुजरातम्

प्रकाशितकृतयः (१) प्रभातना विचारपुष्पो (गुजराती)
(२) काव्यप्रकाशाचमनम् (प्रथमम्)
(३) काव्यप्रकाशाचमनम् (द्वितीयम्)
(४) खुदीरामबोसः (अनुवादः)
(५) चन्द्रशेखर-आज़ादः (अनुवादः)
(६) स्वामिश्रद्धानन्दः (अनुवादः)
(७) सुभाषितपीयूषम्
(८) स्वर्णिमगुजरातसंस्कृतसम्भाषणपुस्तकम्
(९) केसरीसिंहः बारहठः (अनुवादः)
(१०) काव्यालङ्कारः
(११) काव्यप्रकाशः
(१२) शोधप्रविधिप्रवेशः
(१३) साहित्यदर्पणः (१, २ परिच्छेदौ)

विशेषः - दशाधिकशोधपत्राणि प्रकाशितानि (ISSN पत्रिकासु)
- पञ्चचत्वारिंशदधिकसंशोधनपत्राणां विविधेषु परिसंवादेषु प्रस्तुतिः
- एम्. फिल्. (तत्त्वाचार्यः), पीएच्. डी.(विद्यावारिधिः) इत्यनयोः मार्गदर्शकः
- सोमज्योति-पत्रिकायाः सहसम्पादकत्वेन योगदानम्।
- स्वर्णिमगुजरातसंस्कृतसम्भाषणयोजनायाः संयोजकत्वेन कार्यम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालये साहित्यसङ्कायस्य सदस्यः
- श्रीसोमनाथसंस्कृतविश्वविद्यालयेशैक्षणिकपरिषदि सदस्यः (२००८ तः २०११)
- माध्यमिककक्षासु तथा उच्चमाध्यमिककक्षासु लेखकत्वेन समीक्षकत्वेन च कार्यम्। (गुजरातपाठ्यपुस्तकमण्डलम्)
- विश्वविद्यालयस्य विभिन्नसमितिषु सदस्यत्वेन कार्यम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा सारस्वतगौरवसम्मानप्राप्तः



Shree Somnath Sanskrit University - Veraval
Pin - 362 266, Gujarat, India. Ph. : 02876 - 244532 Fax : 244417
e-mail : sssu.veraval@gmail.com, www.shreesomnathsanskrituniversity.info